Barcode : 99999990173054
Title - ( )
Author - .
Language - sanskrit
Pages - 71
Publication Year - 1934
Barcode EAN.UCC-13

BHASA KATHA SARA

VOL. II.—PART III

भासकथासारः

उत्तरार्धः

(तृतीयो भागः ।)

REVISED SECOND EDITION

(With Summaries of the Stories in English)

BY

Y. MAHALINGA SASTRI, M.A., B.L.

All Rights Reserved] 1934 [*Price: Annas 12*

BHASA KATHA SARA

CONSISTING OF ABRIDGED NARRATIONS

IN SANSKRIT PROSE

OF THE STORIES OF THE TRIVANDRUM PLAYS

— ATTRIBUTED TO —

BHASA

BY

Y. MAHALINGA SASTRI, M.A., B.L.,

Advocate, Madras

SON OF MAHOPADESAKA, SASTRA RATNAKARA,

YAJNASWAMI SASTRI AVERGAL,

Advaita Sabha Pandit, Kumbhakonam

Vol. II—Part III

REVISED SECOND EDITION

(With Summaries of the Stories in English)

PUBLISHED BY THE AUTHOR

All Rights Reserved]

1934

[Price: Annas 12

PRINTERS:
St. Joseph's Industrial School Press,
TRICHINOPOLY—1934.

॥ श्रीरस्तु ॥

॥ भासकथासारः ॥

भागत्रयात्मके तृतीयो भागः ।

महाकवि श्रीभासप्रणीतनाटकानां कथासङ्ग्रहः ।

श्रीमद्भरद्वाजकुलतिलकश्रीमदप्पय्यदीक्षितवंशमुक्ताफलानां
महामहोपाध्याय राजुशास्त्र्याख्या विख्यातश्रीत्यागराज-
मखिराजानां प्रपौत्रेण महोपदेशक-शास्त्ररत्नाकरादि-
विरुदाञ्चितपण्डितवरश्रीयज्ञस्वामिशास्त्रिणामात्मजेन
एम.ए., बि.एल्. विरुदभाजा श्रीमन्महालिङ्गकविना
विरचितः ।



द्वितीयं संस्करणम् ।



१९३४

[अस्य मुद्रणादिष्वधिकारस्सर्वोऽपि कवेः स्वायत्त एव ।]

CONTENTS

		Page.
Summaries of the Stories in English	.	. 1 – 10
वत्सराजचरितम्—(प्रतिज्ञायौगन्धरायण-स्वप्नवासवदत्त-नाटकयोस्सारभूतम्)	(१)	. १ – १२
,,	(२)	. १२ – २३
अविमारकचरितम्	. .	. २४ – ३६
चारुदत्तचरितम्	. .	. ३७ – ४५
निगमनम्	. . .	. ४५ – ४६
भासीयश्लोकानुक्रमणिका	. .	. ४७
कविकृतश्लोकानामनुक्रमणिका	. .	. ४८
GLOSSARY	. . .	. 1 – 7

SUMMARIES

OF THE STORIES

IN BHASAKATHASARA, PART III

THE STORY OF VATSARAJA

(1)

UDAYANA, ruler of the Vatsa Kingdom, was fond of elephant-hunting. He played on his lute named Ghoshavati and entranced wild elephants with the melody. One day when he was out elephant-hunting with his party, a stranger-informant brought him news of an elephant of uncommon racial dignity, roaming in the interior of the woods. Udayana left behind him his retinue and trusted himself to the lead of his informant, all alone, with Ghoshavati in hand.

The reported elephant was in fact a ruse of Pradyota, King of Ujjain. It was constructed of wood and armed men were hid within its body. When Udayana was well-nigh entrapped in the thick of the forest, the enemy's men leapt out of the elephant and hemmed him in on all sides. In the skirmish that followed, Udayana single-handed held his foes at bay for several hours; but at last he fell down in a swoon and was taken captive.

Pradyota ordered the royal captive to be housed decently and his comforts to be looked after with a solicitude becoming the dignity of both the royal houses—nay, in course of time, he even entrusted his daughter Vasavadatta, to the prisoner as a pupil to learn the art of playing upon the lute.

The news of Udayana's captivity was received with despair and woe by the royal household at Kausambi, the capital of the Vatsa Kingdom. The loving subjects of Udayana were struck with consternation. The ministers of state hung down their heads for shame. All were miserable. Everybody looked up to Yaugandharayana, the chief minister, as the only person who could take the lead, act heroically and become the saviour in such a mishap. Yaugandharayana faced his responsibility with great fortitude. The love he bore to Udayana was unbounded and was matched only by the implicit confidence which Udayana reposed in him. Yaugandharayana disguised himself as a lunatic and, accompanied by Rumanvan, the commander-in-chief, and Vasantaka, the jester, set forth to Ujjain on his arduous commission.

At Ujjain Yaugandharayana made himself a familiar figure to all the people as a harmless mad man wandering through the streets. But in fact, in that guise, unsuspected by anybody, he was sowing the seeds for a future harvest. He and his associates met often inside a ruined temple in the suburbs of the city and discussed their plans. Vasantaka established communication with Udayana in prison, taking advantage of the privilege accorded to him as a Brahmin to go about unquestioned. Yaugandharayana, within a short time, succeeded in placing his own trusted men in the several services of importance in the enemy's state.

Now Pradyota had a State-elephant named Nadagiri which was the rarest of its kind. Pradyota not only prized Nadagiri as the most valuable possession, but he regarded it with special esteem as the most auspicious animal for a master to own. Yaugandharayana after having disposed of certain arrangements preliminary to the projected escape of Udayana from prison, roused Nadagiri to fury and madness by conflagrations, beat of drum, intoxicating herbs, incantations, magical practices and the like, and made it break its bonds and roam about wildly through the streets of Ujjain causing confusion and death in its track. Pradyota, too fond of his favourite elephant to think of subduing it at any risk to its life or limbs, called upon Udayana, as was expected, to save the situation. Udayana had no difficulty in restoring Nadagiri to complete docility with the aid of the entrancing melodies of his Ghoshavati.

According to the original plan of Yaugandharayana, Udayana should have effected his escape on Nadagiri itself. No elephant on earth could successfully set up a pursuit behind Nadagiri and none other than Udayana could exact the maximum speed from it. But this plan had to be abandoned as Udayana decided upon an elopement with Vasavadatta for whom he had nourished a passion in prison.

Udayana rode back on Nadagiri to the presence of Pradyota and conducted himself as if he was quite at ease with his environment. In order to repay confidence with confidence, the noble-hearted Pradyota desisted from re-incarcerating Udayana.

Some time passed. Yaugandharayana suborned the driver of Bhadravati, the she-elephant of Vasavadatta, stationed his own men in hiding places along the path of the proposed escapade, caused the city guards to get drunk and then sent instructions to Udayana. At the appointed hour Udayana eloped with Vasavadatta on the back of Bhadravati. The

city guards woke up for a pursuit when it was too late. Yaugandharayana then cast off his disguise and flung himself sword in hand upon the enemy's advancing array. He arrested the pursuit for a while, but his sword breaking against the tusk of an elephant, he was taken prisoner. In an interview, Bharatarohaka, minister of Pradyota, tried to ridicule the morality of the methods which Yaugandharayana employed for the sake of rescuing Udayana. Yaugandharayana defended himself successfully and made Bharatarohaka speechless with counter-attacks on the latter's diplomatic methods. At last the minister of Pradyota honoured the minister of Udayana with a present of a golden vase and released him.

Angaravati, the queen of Pradyota, became inconsolable on hearing of her daughter Vasavadatta's conduct. In order to please her the marriage of Udayana and Vasavadatta was celebrated in the presence of Yaugandharayana, with the portraits of the bride and the bridegroom as substitutes for the runaways.

---

(2)

UDAYANA, already indolent and pleasure-seeking, became all the more so after bringing home Vasavadatta. He paid little heed to the affairs of State and made indulgence in amorous diversions his only occupation. An enemy of his named Aruni seized this opportunity to encroach upon the kingdoms of Udayana bit by bit, until at last very little was left over except Kausambi, the capital city.

Yaugandharayana and Rumanvan lamented over the plight and held council together with a view to concerting measures for redeeming the lost dignity and status of the royal house. There was the King of Magadha named Darsaka who could be a valuable political ally to Udayana. His alliance could best be secured by bringing about the marriage of Padmavati, sister of Darsaka, with Udayana. Soothsayers had already predicted that Padmavati was destined to become Udayana's queen ; and such predictions were never known to fail. But with Vasavadatta living, Darsaka could not be expected to consent to the alliance ; neither would Udayana accept another bride. Therefore the ministers concluded that Vasavadatta must be taken out of the way. Yaugandharayana explained the situation to Vasavadatta and made her agree to his plan of separating her for a time from the king.

Udayana once encamped in a village called Lavanaka, and thence went into the forest for hunt. Before he returned, Yaugandharayana caused it to be reported that Vasavadatta was consumed in a rural conflagration and that Yaugandharayana, attempting to rescue her from the flames, also became a prey to the fire.

Yaugandharayana took Vasavadatta, now called Avantika, to Magadha and there left her in the care and custody of Padmavati, pretending that Avantika was his sister and that he was setting out in search of Avantika's husband alleged to have wandered away to distant countries. Padmavati was very much impressed with Avantika's chaste manners and dignified demeanour and treated her with profound affection and esteem.

In the meantime, in Lavanaka, Udayana on being informed of Vasavadatta's demise in fire, was beyond himself with grief. He made several attempts to throw himself into the fire. His ministers anxiously attended on him day and night and at last with very great difficulty persuaded him to leave Lavanaka, which was full of memories of Vasavadatta and take to travel through new countries for the sake of diversion.

In the course of the tour Udayana was brought by his ministers to Magadha. In Magadha, Udayana was Darsaka's guest. The charming personality of Udayana, his gentle and lovable qualities and his exceptional cultural attainments so captivated Darsaka that the latter before long, offered to give Padmavati in marriage to Udayana. However distasteful the idea of a second marriage was to Udayana, he yielded to the pressing importunities of his ministers and agreed to the alliance.

The marriage was celebrated with pomp and splendour becoming the royal dignity of both the parties. Udayana approved of Padmavati's beauty and was much attracted by her simple and innocent nature, her noble qualities of heart, and charming demeanour. But he could not forget Vasavadatta. He regarded Vasavadatta as his beloved, but Padmavati at best an amiable companion. In the midst of the marriage festivities, one day, Udayana was talking confidently to his friend Vasantaka in the pleasure garden. He declared that Padmavati was far from displacing Vasavadatta from his heart, though the latter had passed away never more to be seen. This declaration was overheard by both Padmavati and Avantika. The former admired the king all the more for his constancy in love. The latter drew a sigh of relief considering

herself amply rewarded for all the pangs of separation she had voluntarily suffered for the sake of her lord's prosperity.

Another day, Padmavati was reported to be suffering from a headache and the king was told that she was to go to bed for the night in a secluded summer-house. He went thither after night-fall to comfort her. But finding that she had not yet arrived at that house and feeling a little fatigued he laid himself down on the bed and in a few minutes went to sleep. Into the apartment then came Vasavadatta hoping to find Padmavati. The room was poorly lighted and she mistook the king for Padmavati "I believe she is now free from the pain as she sleeps well" she said to herself and sat on a corner of the bed The king who had been for some days oppressed by the rekindled memories of Vasavadatta began to talk aloud in his dream. He addressed his beloved by name several times and with words betraying desperate passion stretched out his hands to pacify her as if she were cross with him. Finding that she was by the side of the king, Vasavadatta stepped away from the bed, looked at her lord pathetically for a while with eyes brimming with tears, trembled to think that she might be revealed and left the apartment in a hurry after restoring the outstretched hands of the king to their position on the bed. No sooner did the king feel the exhilarating touch of Vasavadatta's hand on his body than he woke up with a quickening tremor of joy and rushed out to hold back his beloved. But in the excitement of the moment he struck his head against the door-post and staggered behind in miserable confusion. From that day he could not believe that Vasavadatta was dead, but hoped that sooner or later she would reveal herself to him.

When the marriage festivities were over, the king took Padmavati, with Avantika in her train, to Kausambi. With the military aid of Darsaka, Rumanvan vanquished Aruni and reclaimed all the lost territories belonging hereditarily to the Vatsa King. Udayana was in the height of his glory again, but the grief for Vasavadatta was eating his heart away.

On coming to know of Udayana's tenderness to the memory of Vasavadatta even when she was no more, Pradyota and Angaravati felt a loving compassion for him and sent a message of consolation to him coupled with congratulations upon his recouped political ascendancy. Their emissaries, the chamberlain, and the old nurse of Vasavadatta, brought with them a portrait of Vasavadatta. After delivering the messages in due form, the chamberlain presented to the king the portrait of Vasavadatta saying, "Their Royal Highnesses

have sent this to you for your comfort in your condition of bereavement."

The king received the portrait and gazed at it with eagerness. Padmavati also peeped in with curiosity and on examining the picture closely exclaimed in wonder, "My lord, a lady who exactly resembles this portrait is living with me!" At that moment Yaugandharayana appeared in disguise and demanded from Padmavati the restoration to him of his sister. The king was perplexed. He ordered Avantika to be brought and to be restored to her brother in the presence of the chamberlain and the nurse, as witnesses. The nurse on seeing Avantika screamed aloud with astonishment, "Our Princess Vasavadatta to be sure!" At the same instant Yaugandharayana cast off his disguise, fell upon the feet of the King and begged pardon of him for separating Vasavadatta from him for so long a time. The king wept for joy, embraced Yaugandharayana and confessed with overpowering feelings of gratitude that he owed everything to the faithfulness, sagacity and unceasing vigilance of the minister.

The happy couple then, with their party, set out to Ujjain for paying their respects to Pradyota and Angaravati.

THE STORY OF AVIMARAKA

KUNTIBHOJA, King of Vairantya, had a daughter named Kurangi. His two sisters were respectively the queens of Ka-i Raja and Sauvira Raja; the latter was, further, the brother of Kuntibhoja's queen. Kasi Raja had a son named Jaya Varman. Sauvira Raja had a son named Vishnu Sarman.

Vishnu Sarman was really the son born to Sudarsana, queen of Kasi Raja by Agnideva, and adopted by her sister, the queen of Sauvira Raja, who was childless. Being of semi-divine origin, Vishnu Sarman showed super-human valour and prowess at a very early age. While yet a boy of tender years, he vanquished an Asura, who in the guise of a goat (Avi) went about killing people in populous cities. This adventure gave him the title of Avimaraka.

Now it came to pass that Sauvira Raja was unlucky enough to incur the curse of a sage named Chandabhargava, in submission to which he had to live incognito for a period of one year in the guise of a chandala. Sauvira Raja took his abode in the chandala-quarters attached to the city of Kuntibhoja and Avimaraka lived with his father similarly disguised.

Kurangi grew up as a beautiful young maiden and her parents desired to give her in marriage to Avimaraka, son of Sauvira Raja. But messengers reported that Sauvira Raja and his son were mysteriously missing for some time and that the government of the State was conducted by the ministers. Upon this disappointing news, Kuntibhoja and his queen were constrained to accept the proposal of Kasi Raja that Kurangi might be married to his son Jaya Varman. However, there was no display of hurry on either side, and the proposal did not progress to a state of fulfilment.

In the meantime, while Kurangi was one day returning in her palanquin with her company of girls from the royal park to the harem, the State-elephant named Anjanagiri got wild, broke its bonds and pursued the party threatening destruction. The palanquin of Kurangi was abandoned by the frightened guards and the girls set up a cry of despair. The elephant itself swung up its trunk to smash the palanquin and drenched Kurangi with the sprays from its nostrils. At this critical juncture, a handsome youth rushed to the spot, gave the elephant a slap with his hand and turned the latter's fury against himself. He beguiled the animal to a distance and held it engaged in a sham fight till the ministers of Kuntibhoja secured it.

Kurangi went home safe; but she could not forget the youth who so heroically delivered her from the peril. The fire of love began to burn steadiiy at her heart and her tender body was unable to withstand its withering effects. The nurse of Kurangi and Nalinika, the attendant, watched the change in her condition with great anxiety and set about to devise a remedy. They were shocked to discover the cause of the malady, and almost despaired of doing anything to purpose, when an aerial message came to their succour:—"you may ignore the apparent fact that the youth is a low caste and proceed to bring the two together as if there is no disparity of birth between them. His true status shall become revealed to you in course of time."

Encouraged by this assurance the nurse and Nalinika proceeded to the abode of Avimaraka and found him love-sick doting upon his recollections of the elephant-incident. The nurse settled with Avimaraka that he should enter the harem unobserved scaling the walls that very night.

Avimaraka had little difficulty in climbing over the harem walls and reaching the apartment of Kurangi where Nalinika was waiting for him.

Avimaraka lived with Kurangi for several days concealed in the harem. But soon suspicions arose in the mind of Kuntibhoja that something was amiss and he ordered the harem guards to be more vigilant than ever. Avimaraka found it impossible to live there longer in concealment and therefore effected his escape. But separated from his beloved he found life intolerable. He went up a forest-clad mountain and attempted to throw himself into a forest-fire. But Agni his father would not burn him. He therefore thought of throwing himself down from a precipice. But then a Vidyadhara, who happened to alight upon that mountain with his wife, bade him take heart and gave him a magic ring which when worn in the right-hand finger would make the wearer invisible to mortal eyes. Avimaraka with the ring properly used had no difficulty at all in re-entering the harem. He was just in time to prevent Kurangi from committing suicide by hanging herself. Again the couple lived happily, secure from all fear of molestation by anybody.

In the meantime, the parents of Kurangi despairing of discovering Avimaraka determined to give Kurangi in marriage to Jaya Varman. Sudarsana herself with Jaya Varman was brought from Kasi to the palace of Kuntibhoja by Bhutika, the latter's minister. The marriage day itself was about to be fixed, when Sauvira Raja who had served his full period of living incognito revealed himself to Kuntibhoja. As even Sauvira Raja was unable to give any account of his son, the whole group was sunk in melancholy.

At that juncture Narada appeared and announced that Avimaraka was in the palace and was already the husband of Kurangi. Kuntibhoja felt ashamed that his own harem should have been so defiled. But Narada justified the conduct of the couple and allayed his conscience. Kurangi and Avimaraka were then brought out of the harem. A sister of Kurangi, Sumitra by name, was given in marriage to Jaya Varman. Narada presided over the festivities.

THE STORY OF CHARUDATTA

THERE was in Ujjain a Brahmin merchant named Charudatta who having run through his fortune in improvident philanthropy, at last found himself absolutely poor. In his condition of indigence and loneliness, he had three consolations which helped him to sustain his interest in life; namely, a wife who was faithfully devoted to

him; a friend named Maitreya who never gave up his company; and his own unsullied reputation for character.

There lived at that time a lovely youthful courtezan called Vasantasena—the ornament of Ujjain. Every youth of Ujjain was virtually her admirer, and Charudatta was no exception, though he restrained his passion because of his poverty. But Sakara, the king's brother-in-law, a lustful, impudent coward, was intent upon making her his own by force or persuasion whichever could prevail. Vasantasena loved Charudatta with all her heart, not for his riches—for he had none—but for the golden qualities of his heart.

One evening when darkness was growing thick, Vasantasena, returning home from the temple of Kamadeva, found herself pursued through the streets by Sakara and two of his hirelings. Luckily for her, the house of Charudatta was close by and she managed to enter into it stealthily just when, Radanika, a maid-servant of Charudatta, was coming out of the house into the street. Sakara caught hold of Radanika and began to drag her, mistaking her for Vasantasena. Radanika cried for help. Maitreya, the friend of Charudatta, appeared with a lamp, and rated high the impudence of Sakara. Sakara released Radanika and left the place after uttering frightful threats against Charudatta for the latter's detention of Vasantasena with all her jewels.

When Charudatta became aware of Vasantasena's presence in his house, the latter paid her respects to him and said, "Sir, give me protection from the wicked pursuers who covet the valuable jewels I am wearing. I wish to go to my house under your escort, after depositing all my jewels with you." Charudatta accepted the deposit and commissioned Maitreya to give her a safe escort to her house.

Charudatta immediately felt that it was an onerous responsibility that he had accepted, as the jewels could not be kept safe anywhere in his old house. He therefore entrusted the custody of the jewels to his maid-servant and to Maitreya with directions to take care of them by turns.

On the third night after the above said happenings, when Maitreya was weary and sleepy, Radanika put the jewels into his hands and retired to bed. Maitreya went to sleep with the jewels in his hand carelessly bundled up.

On that night, it happened that an adventurer named Sajjalaka was in quest of some means with which to purchase the freedom of a charming female slave of Vasantasena, Madanika by name. He broke into the house of Charudatta

and after a desperate search, discovering the jewels held by Maitreya, picked them up and effected his escape. Radanika who was the earliest in the house to wake up, descried a breach in the wall and immediately set up a shout. Charudatta and Maitreya, roused from their sleep, came to realise what had happened. "Who will believe this account of the loss of the jewels" cried Charudatta, "the world is always harsh towards the poor and I am sure, I shall be made the culprit." On coming to know of Charudatta's misfortune, his wife sent for Maitreya and gave into his hands a necklace, set with precious gems of inestimable value, which she was wearing. Maitreya announced to Charudatta the gift of the Brahmani. Charudatta regretted that he had come to such a plight as to be compelled to accept a woman's proffer of help. He commissioned Maitreya to go to Vasantasena and persuade her to accept the Ratnavali as a compensation for the lost jewels.

Next morning Sajjalaka took the jewels to Madanika and informed her that he proposed to purchase her liberty with them. But Madanika discerning the jewels to be her mistress's own, prevailed upon Sajjalaka to deliver the jewels to Vasantasena on the pretext that he was an embassy of Charudatta. Vasantasena overheard this conversation and resolved to derive some fun out of the situation.

In the meantime, Maitreya arrived with the precious necklace and Vasantasena accepted the substitute with apparent satisfaction, though regretting within herself that on account of her being born a courtezan even Charudatta considered her mercenary.

When Sajjalaka arrived with the stolen jewels on the pretext of restoring them to Vasantasena in accordance with Charudatta's directions, Vasantasena said she had a message of reply to be conveyed to Charudatta. Sajjalaka replied that he was not going back to Charudatta. Then she put it to him that he must have got the jewels by illegal means. Sajjalaka hung down his head in shame and confusion. Then Vasantasena with a kindly smile, beckoned Madanika to her side, decked her with a profusion of ornaments and made a present of her to Sajjalaka. After seeing the couple depart in a coach, Vasantasena herself, looking at the clouds which suddenly darkened the sky, prepared to set off to the residence of Charudatta with the ostensible object of returning the Ratnavali to him. Vasantasena and Charudatta met as lovers who had for long pined for each other's company.

॥ श्रीरस्तु ॥

भासकथासारः ॥

तृतीयो भागः ।

॥ वत्सराजचरितम् ॥

(१)

कुलं वा शीलं वा विभवमथवा मानविशयं
जनस्य स्निग्धस्याप्यनुमतमनादृत्य सहसा ।
यदाज्ञां बाला अप्यनुविदधते निश्चितधियो
नमस्तस्मै सद्यःप्रभवदुपदेशाय गुरवे ॥

पुरा किल प्रकाशराजर्षिनामधेये भारते वंशे जातो निखिल-लोकोपगीतकीर्तिर्मूर्तिमानिव जनसमुदयाभ्युदय उदयनो नाम शतानीकपुत्रः प्रजावत्सलो वत्सराजः पृथिवीमशिषत् । तस्य च कौशाम्बी नाम प्रधाननगरी ॥

स बाल्य एव प्रतापवत्तया शमितारातिदुरितो निराबाधां श्रियमनुभवन्, शनैर्यौगन्धरायणाद्येषु मन्त्रिमुख्येषु राज्यरक्षाधुरां विन्यस्य सुखेष्वेकान्ततत्परो बभूव । अनारतं स मृगयाव्यसनेन नागवनानि बभ्राम । तस्य च गान्धर्वपारदृश्वनः कुलोपलालितां घोषवतीं नाम कलनिर्ह्रादिनीं वीणां वादयतो दन्तिनः सुखेन वशमाययुः ॥

एवं क्रीडतस्तस्य प्रत्यन्तवर्ती प्रद्योतो नामोज्जयिनीभर्ता साम्मुख्येन समराक्षमामक्षौहिणीमाकलय्य छलेन ग्रहणमनुचिन्तयामास । इयेष चाभिलषणीयवरगुणाय दर्पादनाकाङ्क्षितसम्बन्धाय्यस्मै प्रदातुं निरतिशयलावण्यशालिनीमात्मनो दुहितरं वासवदत्ताम् । तेन हि युक्त्या स कुवलयश्यामलं महान्तं यन्त्रहस्तिनं निर्माय, अमात्यशालङ्कायननेतृकं वीरपुरुषाधिष्ठितं तं मृगयालोलुपस्य वत्सराजस्य विहारोचिते विषयान्तगहने स्थापयामास ॥

अथ कदाचिदुदयनो नर्मदां तीर्त्वा, वेणुवने परिच्छदमवस्थाप्य, गजयूथविमर्दयोग्येन बलेन नागवनं प्राप्तः, मदयन्तीपर्वतमनासाद्यैव तटाकोत्थितं नागयूथं निध्यायन्, केनाप्युपस्थितेन पदातिना विज्ञापितोऽभूत्—"भर्तः! इतः क्रोशमात्रे मल्लिकासालप्रच्छादितशरीरो नखदन्तवर्जमेकनीलो हस्ती मया दृश्यते" इति । ततस्तं सुवर्णशतप्रदानेन परिपूज्योदयनः स्वानुचरान् प्रत्यभाषत—"अस्त्येष चक्रवर्ती हस्ती नीलकुवलयतनुर्नाम हस्ति-

शिक्षायां पठितः । तदप्रमत्ता भवत यूयमस्मिन्यूथे । गजं तमहं वीणाद्वितीय आनयामि" इति ॥

तदा तमुपरुध्य रुमण्वान्नाम मन्त्री विज्ञापयामास—"स्वामिन्, न खलु ते ऐरावणादीनामपि दिशागजानां ग्रहणं न सम्भावनीयम्। किन्तु आसन्नदोषाणि विषयान्तराणि; यत्र रन्ध्रान्वेषी प्रत्यन्तनिवासी जनः। तन्नैकाकिना स्वामिना गन्तव्यम्। अहमप्यनुवर्ते" इति। उदयनस्त्वमात्यमात्मजीवितनिर्दिष्टेन शपथेन निवार्य, सुन्दरपाटलं नामाश्वमारुह्य, अनर्धोद्गते सूर्ये विंशतिमात्रेण पदातिभिस्सह प्रतस्थे ॥

गतस्य च तस्य कञ्चिदध्वानं सालवृक्षच्छायायां सावर्ण्यनष्टनीलतया प्रोद्भासमानाभ्यामशरीरविनिक्षिप्ताभ्यामिव दन्तमुकुलाभ्यां सूचितो धनुश्शतमात्रेणेव दृष्टिगोचरोऽभूत्स दिव्यवारणप्रतिच्छन्दः। ततस्तेनाश्वादवरुह्य देवतानां प्रणामं कृत्वा गृहीता वीणा। तदानीमतर्कितोत्पतनं समुत्पत्य तस्मात्कृतकहस्तिनः प्रद्योतभटास्तमभिदुद्रुवुः। तत्कूटं प्रद्योतप्रयोगमवगत्य शूरोऽभिमान्युदयनः सुन्दरपाटलमारुह्य, महता रोषेणाविष्टः खड्गमात्रसहायः प्रविवेश तत् परबलम् ॥

ततः परिक्रीडमान इवैकाकी बहुषु प्रहरन् अनुबद्धदिवसयुद्धपरिश्रान्तो गाढप्रहारजर्जरिताङ्गः स प्रतपत्सूर्यदारुणायां वेलायां मोहं गतः। नियन्त्रितोऽभूच्च शत्रुभिः प्राकृत इव सन्निहितगहनोत्पाटिताभिः कर्कशाभिर्वनलताभिः ॥

अथ चिरात्प्रत्यागतसंज्ञमेनं पूर्ववैरमनुस्मृत्य पापनिश्चया-नभिद्रवतः कांश्चिन्नृशंसान् सहसोपस्थितः प्रद्योतामात्यः शालङ्कायनो निवारयामास । ततः शरीरयन्त्रणात्स वत्सेशं मोचयित्वा सोपचारं सान्त्वनानि भणन्, गाढबहुप्रहारतया वाहनासनासमर्थ इति, स्कन्धवाह्यं शयनमारोप्योज्जयिनीं निनाय ॥

अतिस्नेहाद्वासवदत्तायां वरगुणेष्वतिमात्रलुब्धस्य महासेनस्य, वत्सराजप्रतीक्षयैव कन्यार्थिभ्यो गोत्रानुगुणेभ्यो राजकुलेभ्यो निश्चयवचनमभणित्वा कालं यापयतः, तद्ग्रहणवृत्तान्तश्रवणेन महत्स्वप्यभ्युदयेष्वननुभूतपूर्वा मुदश्चेतसि समभूवन् । अथास्य शासनेन विशिष्टेन सत्कारेण प्रवेशितो वत्सराजः कृतव्रणप्रतिकारः समुपचरितो राजपुरुषैः, आतपहितायां मणिभूमिकायां कल्पितनिवासोऽभूत् । शालङ्कायनप्रहितां समरावजितंरत्नं वत्सराजस्य गजबन्धनलीलासखीं घोषवतीं तु, प्रद्योतः वैताल्यास्सकाशं अचिरोपक्रान्तवीणाशिक्षायै वासवदत्तायै दापयामास ॥

अत्रान्तरे कौशाम्ब्यां, "नीलहस्तिनमुपस्थाप्य प्रद्योतः स्वामिनं छलयितुकामः" इति चारमुखेनाधिगतप्रवृत्तिर्मेधावी यौगन्धरायणः, प्रागेव नागवनप्रवेशाद्उदयनस्य सलेखं पुरुषं विसृष्टुं तत्वरे । त्वरमाणस्य चास्य समुपागाद्धंसको नाम भर्तुरुपस्थायकः सर्वमतिक्रान्तं वृत्तान्तमावेदयितुम् ॥

श्रुत्वा च स्वामिनो विपत्तिं नितरां विषण्णो निरुपाधिकस्वामिभक्तिपरायणो यौगन्धरायणः सकरुणमब्रवीत्—"हन्त!

भोः! छलिताः स्मः । महान्खलु भारः प्रद्योतेन भाग्यवशाल्लघु निस्तीर्णः । अद्यप्रभृति वत्सराजसचिवानां प्रतिष्ठितमसामर्थ्यमयशश्च । अहो! जाग्रतोऽपि बलवत्तरः कृतान्तः" इति । विललाप च पुनः स्वामिनोऽवस्थान्तरं चिन्तयित्वा—"कथं महाराजोऽपि प्राकृतैः प्रधर्षणं प्राप्तः । कथं तस्मिन्मणिवलयार्हे, चापास्फालनकर्कशपर्वाणि, विप्राणामर्चयितरि, सुहृदां श्रमेष्वाश्लेषसत्कारप्रणयिनि, पीनांसे, भुजद्वये बन्धनं न्यस्तम् । कथमगणितपूर्वं द्रक्ष्यति प्रद्योतं स्वामी । कथं स नरलोकाभ्यर्चितशासनः श्रोष्यत्यनर्हपुरुषभाषितानि । कथं निरुद्धो वन्ध्यं धारयिष्यत्यरातिष्वमर्षम् । अद्य खलु नूनमस्य तिथिपूजनेषु देवताप्रणामकाले प्रचलिताः पटहस्थाने निगडाः स्वनन्ति । हा धिक्! भर्तृपिण्डस्यानिष्कृतिपरैः किमस्माभिरिह प्रयोजनम्" इति । भूयस्सखेदं स हंसकमप्राक्षीत्—"अथ मामन्तरेण स्वामी न किञ्चिदाह" इति । हंसको न्यवेदयत्—"आर्य, अस्ति । बाष्पोपरुद्धकण्ठेन बहुकं सन्देष्टुकामेनेवास्मि भर्त्रोक्तः—'गच्छ, यौगन्धरायणं प्रेक्षस्व' इति" इति ॥

तदात्वे वत्सराजविपत्तिं श्रुत्वा सर्वमन्तःपुरं प्रचुक्षुभे । समादिशच्च प्रतीहारीमुखेन यौगन्धरायणं राजमाता—"यः खल्विदानीं सङ्कटेषु न विप्रतिपद्यते, विषमगतो न विमुह्यति, वञ्चितो न निर्वेदं गच्छति, प्रतिघातेषु नावसीदति, स खलु बुद्धिमांस्त्वमभ्यर्थ्यसे, यः प्रथममेव वत्सस्य वयस्यः पश्चादमात्यः, 'आनयतु पुत्रकं पुत्रकः' इति" इति ॥

तदा भर्तृमातृ-भर्त्रोस्सर्वसचिवमण्डलमतिक्रम्य स्वस्मिन्नेतादृशीं प्रतिपत्तिमवेक्ष्य, यौगन्धरायणो जीवितप्रदानेनापि प्रत्यानेतुं स्वामिनं व्यवस्थितमतिः समाददे धीरमिमां प्रतिज्ञां—"मोचयामि न राजानं, नास्मि यौगन्धरायणः" इति ॥

तत्क्षण एवोन्मत्तवेषेण प्राप्तः, भरतकुले धृतवात्सल्यो भगवान्द्वैपायनो राज्ञश्शान्तिनिमित्तं भोजनोपनिमन्त्रितं ब्राह्मणजनमुद्दिश्य, "स्वैरं स्वैरमश्नन्तु भवन्तः। अभ्युदयः खल्वस्य राजकुलस्य भविष्यति" इत्युक्त्वा तिरोबभूव। तेन च परित्यक्तान् परिच्छदविशेषान् केनचिद्ब्राह्मणेनोपनीतान् यौगन्धरायणः प्रतिगृह्य, "इदानीं मदुपदेशार्थमेवासौ भगवानागतः" इति निश्चिन्वानः पर्यधात् ॥

एवमुन्मत्तवेषप्रच्छादितोऽसौ मन्त्रिमुख्यः, प्रतिज्ञया किञ्चिदिवाश्वासितां राजमातरमनुज्ञाप्य, श्रमणकवेषेण रुमण्वता, डिण्डिकच्छद्मभाजा राजवयस्येन वसन्तकेन चानुगम्यमान उज्जयिनीं प्राविशत् ॥

तत्र च नीतिवित्स गूढपुरुषांस्तेषु तेषु प्रयोगौपयिकेषु करणीयेषु व्यापारयामास। वसन्तकस्तावद्विप्र इति राजकुले उपायनादिग्रहणव्याजेन लब्धप्रवेशो बन्धनस्थितेन चोदयनेन सह नवमिव मित्रभावमापन्नः तत्प्रार्थनया तत्र शश्वद्गमनागमनं कर्तुं प्रवृत्तः ॥

अथैकदा कालाष्टम्यां धात्रीद्वितीया शिबिकामारुह्य वासवदत्ता बन्धनद्वारस्याग्रतो भगवत्या यक्षिण्याः स्थाने देवकार्यं कर्तुं गता आसीत् । तस्मिन्दिवसे यदृच्छया बन्धनपरिरक्षकमनुमान्य बन्धनगृहद्वारे निष्क्रान्त उदयनः, पुरुषस्कन्धपरिवर्तनावस्थितायां शिबिकायां, राजदारिकां प्रकाममालोकयामास । सापि सुन्दराङ्गं तं दृष्ट्वा चेतसि रागं बबन्ध ॥

एवं स्थिते प्रद्योतः, येन स्वस्मिन्नर्थिभावं प्रपन्नः प्रह्वीभवेद्वत्सराजः तादृशमस्य स्वदुहितरि प्रेम समासञ्जयितुकामः, चिरोद्दिष्टाय वराय तस्मै वासवदत्तां—"गान्धर्वमेनां शिक्षय" इति शिष्याव्यपदेशेनानग्निसाक्षिकं प्रादात् । एवमव्याजदर्शितानुकूल्यो दैवेन वत्सराजः तदाप्रभृति विपक्षग्रहणपरिभवमनाकलय्य बन्धनमपि प्रमदवनं संभाव्य तुल्यानुरागया राजपुत्र्या सह प्रवृत्तो रागलीलां कर्तुम् । इयेष च निजबन्धनावमानस्य प्रतिक्रियामन्विष्यन्, उपारूढेन प्रेम्णा तातपक्षपराङ्मुखीं प्रद्योतदुहितरमपहर्तुम् । वसन्तकमुखेनापि संदिदेश, यौगन्धरायणाय, "मन्मनोरथानुगुण्येनैव निर्गमनोपायस्य समर्थनं मह्यं रोचते । समाने गमने प्रद्योतस्यावमानविशेषश्चिन्त्यते । मा कामप्रधान इति मामवमन्यस्व" इति ॥

अथ सङ्केतानुरोधेन नगराद्बहिर्जनसम्पातवर्त्मनो दवीयसि क्वचिज्जीर्णे देवकुले स्वामिनश्चापलमन्तरेण रुमण्वद्यौगन्धरायणौ

विदितार्थौ कर्तु तयोरागमनं डिण्डिकवेषो वसन्तकः प्रतिपालयन्, अपहृतमिवात्मनो मोदकमल्लकमन्विष्यन् सुहृदभिज्ञानहेतोर्गूढार्थां कामप्युद्घोषणां प्रस्तुवन्नास्त । तदभिज्ञायोन्मत्तवेषच्छन्नो यौगन्धरायणः प्राविशत् । तयोश्च मोदकमल्लकानुसारिणा वाक्कलहेन परस्परमसूच्यन्त तत्तन्नयारम्भविशेषाः। उभयोरुच्चकैराक्रोशशब्देन श्रमणकच्छद्मा रुमण्वानपि तत्रानीयत ॥

एवं व्याजेन मिलितास्ते निर्मक्षिकमन्तर्गृहं प्रविष्टा विस्रम्भेण मिथः कथयितुमारभन्त । तदा यौगन्धरायणः स्वामिनोऽपवाहनार्थं समनन्तरादिन एव प्रयोजयिष्यमाणानि संविधानान्युपवर्णयामास । "श्वः किल स्वामिनो निर्गमनं साधयिष्यते । तत्र च वसन्तकेन स्वामी प्रतिबोधयितव्यः । नैकविधैर्मन्त्रौषधिप्रयोगैः व्यामोहितो मङ्गासेनहस्ती नळागिरिः शालासन्निकृष्ट गृहोद्दीपनेन त्रासयित्वा धूपैः प्रतिगजमदैः शङ्खदुन्दुभिस्वनैश्च सहसोन्मादयिष्यते । प्रमत्ते च तस्मिन्दुर्नियन्त्रणे समन्तात् संक्षोभयत्युज्जयिनीं, निश्शरणः प्रद्योतः समुद्विग्नैः परिवारैः परिगतः स्वामिनमेव शरणमुपयास्यति । तेन च नळागिरिग्रहणार्थं बन्धनाद्विमुक्तः स्वामी घोषवतीं वादयन् तं मत्तवारणं स्वाधीनतामुपनीय तस्मिन्व्यवस्थितासनः जवेन निष्क्रमिष्यति ।" इति ॥

तदा सिद्धप्रायमस्मत्परिश्रमफलमिति मन्यमानाय यौगन्धरायणाय वसन्तकः काममोहितं वासवदत्तानुगमनाद्दते बन्धमोक्षमप्यबहुमन्यमानं राजानं न्यवेदयत् । सर्वारम्भविघ्नकरमिमं

निरपत्रपस्य स्वामिनो बन्धनागारेऽनुपस्थितदेशकालं रागानुबन्धं श्रुत्वा खिन्नोऽपि धीमान् भक्तिमांश्चासावमात्यवर्यः, "सवासवदत्तः स्वामी वा मोचयितव्यः; अनेनैव वेषेण जरा वा गन्तव्या" इति द्वितीयां प्रतिज्ञामङ्गीकृत्य, राज्ञो मनोरथानुरूपं निष्क्रमणं साधयितुमुपायमन्वियेष । अथावधृतानन्तरकरणीयानामेषां सङ्घातो बिभिदे ॥

ततस्सङ्कल्पितेन विधिना उन्मादिते नळागिरौ अशिक्षितदुर्निग्रहे नगरीमुद्भ्रमति, सुहृदां स्वस्य च जीवितसंशयमापतितमुद्वीक्ष्य संभ्रान्तो महासेन उदयनं विमोचयामास । तेन च घोषवतीद्वितीयेन प्रशान्तवेगः कृतो वारणः । दुहितुरयं प्रणयीति स्वस्य च जीवितप्रदायीति कृत्वा महासेनो न पुनर्वत्सराजं निगडयामास । एवं स्थिते वासवदत्तापनयनानुकूल्याय तस्या एव हस्तिन्या भद्रवत्या निष्क्रमणं निर्वर्तनीयमिति निश्चितवतो यौगन्धरायणस्य निदेशवर्तिना तस्यैव चारपुरुषेण गात्रसेवकनाम्ना हस्तिपकेन सन्निधापितां भद्रवतीमारुह्य सवासवदत्तो वत्सराजः यौगन्धरायणोद्दिष्टेऽहनि अजाग्रत्सु प्रद्योतभटेषु निभृतं निष्क्रान्तः निमिषमात्रातिलङ्घितबहुयोजनः एकाहेनैव नगराद्विन्ध्यवनं वनात्कौशाम्बीं चोपजगाम ॥

अत्रान्तरे, पानमत्तमिवाहिण्डमानं गात्रसेवकं, "वासवदत्तायाः जलविहारार्थं भद्रवतीमुपस्थापय" इत्यनुरुन्धानः कश्चिद्भटः यावत्तं प्रतिबोधयितुं नापारयत्, तावत्, "एष

खलु वत्सराजः वासवदत्तां गृहीत्वा निर्गतः" इति महान्तं नगरशब्दमशृणोत्। अवागच्छदपि क्रमेण गात्रसेवकं यौगन्धरायणस्यैव गूढपुरुषम्। ततः किन्नु खल्वेतदिति विस्मयमाने तस्मिन् प्रावर्तत महद्युद्धं, ससंभ्रमं वत्सराजपदवीमनुपततां प्रद्योतसैन्यानां निजनिजस्थानेभ्यो निष्पतितानां च निरोधमुक्तानामिव कृष्णसर्पाणां यौगन्धरायणपुरुषाणाम्। तदानीं सुदूरमपवाहितवत्सराजो यौगन्धरायणः परिहृत्योन्मत्तवेषमसिद्वितीयः प्रद्योताक्षौहिणीं विगाह्य विहरन् मुहूर्तं तस्था नासीररयं निरुरोध। किन्तु प्रतिपक्षहस्तिनो दन्तावघट्टनेन मध्ये विपन्नासिः तदात्वेऽप्यनिवृत्तपदः; धुरि प्रयुद्ध्यमानोऽसौ ग्रहणमुपगतः। सर्वमेतन्निशाम्य स भटः, "प्राकारतोरणवर्जं कथमियं नगरी कौशाम्ब्येव संवृत्ता" इति विस्मयमानो गत्वा अमात्याय भरतरोहकाय वृत्तान्तं निवेदयामास॥

अथ वत्सराजमपनीय निस्तीर्णप्रतिज्ञाभारस्य भर्तृपिण्डानृण्यं गतस्य, फलानुमितैः प्रतिपक्षामात्यमतिविभ्रमहेतुभिस्तैस्तैर्नयप्रयोगैश्च विस्मापितजगतः, यौगन्धरायणस्य, तदानीं शस्त्रदोषाद्रणे ग्रहणमपि श्लाघनीयमासीत्। रमणीयतरः खलु प्राप्तमनोरथानां विनिपातः। तदा, बद्ध्वा नीयमानमेनं पूर्वमुन्मत्तवेषेण रथ्यासु दृष्टपरिधावनं परिणतौ तु विभाव्यमानमाहात्म्यमाश्चर्यकृतसम्मर्दाः दर्शनाभिलाषिणः पौराः परिवव्रुः। ततो नीतोऽसावायुधागारममात्यनिदेशेन पुरुषगुप्ते देशेऽवस्थापितः सोपहासमचिन्तयत्—"अहो प्रद्योतमन्त्रिणामकाले जागरणम्।

अग्निं बद्ध्वा वत्सराजाभिधानं
यस्मिन्काले सर्वतो रक्षितव्यम् ।
तस्मिन्काले सुप्तमासीदमात्यैः
नीते रत्ने भाजने को निरोधः ॥" इति ॥

अस्य च नीतिगहने प्रमुग्धो भरतरोहकः, नडागिरिणा यद्यपि ग्रहीतुं शक्या भद्रवती, वत्सराजं मुक्त्वा नापरस्तं वाहयितुं समर्थ इति अनुसारे निराशो भूत्वा, बन्धनापन्नं यौगन्धरायणमुपगम्य, "छलेनापवाहितवत्सराजस्य ते कियत्यात्मसम्भावना ? अपि च महासेनस्य प्रतिकूलं कृत्वा कौशाम्बीगतोऽपि स किं स्वस्थो भविष्यति" इत्यवाभर्त्सयत । तदा सोपहासं प्रत्यवादीद्यौगन्धरायणः, "किं न प्रस्तुता भवता पूर्वं सालवृक्षोपरचितनागाश्रिता वञ्चना ? युक्तमेव हि कृतं मया वारणनिग्रहाश्रितां वञ्चनां प्रतिकल्पयता । यत्तु कौशाम्बीगतं वत्सराजं प्रति विभीषिकाभिधीयते, तत्परिहास्यं भवति । भवतामग्रत एव स नन्वपवाहितः । स्वदेशे तस्य रक्षणं किन्नु दुष्करम् । समूलं वृक्षमुत्पाट्य शाखाश्छेत्तुं कुतः श्रमः" इति ॥

तस्य सावष्टम्भगम्भीरोपहासचतुरमात्मनो नीतिविवरणमवधार्य विस्मितो भरतरोहकः पुनस्साक्षेपमाह । "शिष्येति प्रतिगृहीतायाः महासेनदुहितुर्यददत्तापनयनं कृतं युक्तेयं भोः तस्करप्रवृत्तिः" इति । तमित्थं समादधे यौगन्धरायणः । "मा मा भवानेवम् । विवाहः खल्वेष स्वामिनः ।

भारतानां कुले जातो, वत्सानामूर्जितः पतिः ।
अकृत्वा दारानिर्देशमुपदेशं करिष्यति ॥" इति ॥

अतः परं निरुत्तरो भरतरोहकः तस्य स्वामिभक्त्या नय-प्रागल्भ्येन च तस्मिन्नुपारूढबहुमानः, तेन पारितोषिकं भृङ्गारं प्रतिग्राहयामास ॥

अथ तस्मिन्नवसरे वासवदत्तापहरणपरिभवेन शोकाभिभूत-हृदया महासेनमाहिष्यङ्गारवती प्रासादाच्छरीरं मोक्तुकामेति महान् हाहाकारस्समुदभूत्। तां च प्रद्योतः कृच्छ्रेण पर्यवस्थापयामास—"क्षत्रधर्मेणानवद्यस्ते दुहितुर्विवाहः। सर्वथैव च नोऽभिमतोऽयं वरः। किमिदानीं हर्षकाले सन्तप्यसे" इति ॥

ततस्तस्याः परितोषाय विमोचितं यौगन्धरायणं पुरस्कृत्य चित्रालिखितयोर्वासवदत्तावत्सराजयोः परिणयविधिं निर्वर्तया-मास । अनन्तरं यौगन्धरायणस्सत्कृत्य तेन विसर्जितः कौशाम्बीमाययौ ॥

(२)

प्रकृत्यैव सचिवायत्तसिद्धिर्वत्सराजो वासवदत्तालाभात्परं भोगेष्वेकान्तमासक्तमना मान्मथेष्वेव रसक्रमेष्ववगाढः अनान्तः-पुरिकं कमपि वृत्तान्तं न चेतयामास । एवमजिगीषोस्सतत-मनुद्यतस्य चास्य राष्ट्रमण्डलं छिद्रान्वेषिणा आरुणिनाम्ना विपक्षेण

शनैराक्रम्य प्रक्षीणतामनायि। तादृशस्य व्यसनिनो राज्ञस्सचिव-भावेन स्वस्मिन्नायत्तप्रजापालनविधिः खिन्नो यौगन्धरायणः सेना-पतिना रुमण्वता सह मन्त्रयामास। "स्त्रीमद्यमृगयातत्परस्य निश्चिन्तं तिष्ठतः स्वामिनोऽद्य परिशिष्टं कौशाम्बीमात्रमपि राज्यं किं न रन्ध्रप्रहारिभिः परिपन्थिभिरपह्रियेत। यत्सत्यं नीतिपराङ्-मुखस्य राज्ञोऽर्थसिद्धिस्सचिवायत्ता। तदावाभ्यां यथाऽसौ क्रमागतं समग्रं राज्यं प्रतिपद्येत तथा प्रयतितव्यम्" इति। तदर्थं च, सहायबलसाध्यत्वात्पृथिवीजयस्य, मगधराजस्य बलिनो दर्शकस्य मैत्रीभावं संपादयिष्यन्, आदेशिकै राज्ञो देवी भवित्रीत्यादिष्टां तद्भगिनीं पद्मावतीं कथञ्चित्स्वामिनो घटयितुं निश्चिकाय॥

"म्रियमाणायां वासवदत्तायामुदयनो नान्यां परिणेष्यति; दर्शकोऽपि न पद्मावतीं दास्यति" इति समर्थ्यासौ धिषणो-पहसितधिषणो वत्सेश्वरामात्यो देवीं छद्मनमपवाहयितुं कञ्चि-दुपायमन्वियेष। तथा च, कदाचिल्लावणकमावासिते राजनि मृगयानिष्क्रान्ते देवीवासगृहमादीप्य, "हा, हा, वासवदत्ता ग्राम-दाहेन दग्धा। यौगन्धरायणोऽपि तामभ्यवपत्तुकामस्तत्रैव पतितः" इति रुमण्वन्तं व्याघोषयामास। वासवदत्तां तु तत्तदुक्तिभिः स्वनीतिसिद्धौ साहाय्येऽभ्यर्थ्यानुमान्य च यौगन्धरायणो मगध-देशं निनाय॥

तत्र च परिव्राजकलिङ्गोऽसाववन्तिकाव्यपदेशया तया सह किञ्चिदाश्रमपदमुपाजगाम। तदानीमाश्रमस्थां राजमातर-

मभिवादयितुं तत्रैवागतां दर्शकस्य भगिनीं पद्मावतीं तौ ददृशतुः। तां भर्तृदारत्वेनाभिलषतो यौगन्धरायणस्य, "प्रद्योतेन दारकस्य कारणादियमभ्यर्थ्यते" इति चेटीजनेन तापस्यै निवेदितामेनां शृण्वत्या वासवदत्तायाश्च, तस्यां, अभिजनानुरूपेण रूपेण रूपानुगुणया गुणसम्पदा च विशेषिता स्वकीयेति महती प्रीतिरुदपद्यत॥

अथ कृतगुरुजनवन्दना धर्मरतिर्मगधराजपुत्री मुनिजनाभीष्टपूरणेनात्मानुग्रहमिच्छन्ती कञ्चुकिमुखेन, "कथ्यतां किं दीयताम्" इति व्याघोषयामास। तं क्षणमुपलभ्य यौगन्धरायणः समुपगम्यायाचत—"भोः अहमर्थी। प्रोषितभर्तृकामिमां मम स्वसारमिच्छाम्यत्रभवत्या कञ्चित्कालं परिपाल्यमानाम्। इष्टधर्मप्रचारेयं धीरा राजदारिका मद्भगिन्याश्चारित्रं रक्षिष्यति" इति। दुःखं न्यासस्य रक्षणमिति विदत्यपि सत्यवादिनी पद्मावती प्रथममुद्घोष्य न पुनर्विचारयितुं युक्तमिति तदभ्यर्थनामङ्गीचकार। विभाव्य च वासवदत्तां, "यदीदृश्यस्या आकृतिर्नूनमियमभिजनवती" इति निश्चित्य सा राजपुत्री तस्यां सविशेषां बहुमतिमादधे॥

यौगन्धरायणोऽपि, "अर्धमवसितं कार्यस्य। यथा मन्त्रिभिस्सह समर्थितं दिष्ट्या तथैव परिणतम्। प्रतिष्ठिते च स्वामिनि वासवदत्तामुपनयतो मे पद्मावती विश्वासस्थानं भविष्यति; या सिद्धैरादिष्टा नरपतेर्महिषी भवित्रीति। सुपरीक्षितमेवैतत्,

यत्किल सिद्धवाक्यान्युत्क्रम्य न गच्छति विधिः" इति सोच्छ्वासं चिन्तयन् सर्वाननुज्ञाप्य ततो निर्जगाम ॥

अथ लावाणके मृगयानिवृत्तो वत्सराजः मन्त्रिभ्यो देवीदाहं श्रुत्वा अशनिहत इव भूमौ निपत्य, "हा वासवदत्ते! हा अवन्तिराजपुत्रि! हा प्रिये! हा प्रियशिष्ये!" इति बहु विलपन्, तस्याश्शरीरोपभुक्तानि दग्धशेषाण्याभरणानि परिष्वज्य मोहमुपगतः। प्रबुद्धश्च तस्मिन्नेवाग्नौ प्राणान्परित्यक्तुमयतत। ततो महता यत्नेन मन्त्रिभिर्निवारितः वासवदत्तागतयैव चिन्तया, "इह तया सह हसितं, इह तया सह कथितं, इह तया सहोषितं, इह तया सह कुपितं," इत्येवं विलपन् सर्वावस्थास्वपि निरन्तरमनुवर्तमानेन रुमण्वता कृच्छ्रेण पर्यवस्थाप्यमानः विरहानलोष्म-दुस्सहान् प्रस्थितान् प्राणान् कथञ्चिद्धारयंस्तस्थौ। तादृशस्य तस्य लावाणकावस्थितिरनुकलं वासवदत्तां स्मारयित्वा विरहानलं सन्धुक्षयतीति कृत्वा, हृदयविनोदार्थं तममात्यास्तस्माद्ग्रामादपवाहयामासुः। समानयन्नपि तं यौगन्धरायणमन्वमनुतिष्ठन्तस्ते दर्शकस्य विषयान् मगधान् ॥

एवमन्यप्रयोजनेनागतस्योदयनस्याभिजनविज्ञानवयोरूपादिकं दृष्ट्वा कालज्ञो दर्शकः स्वभगिनीं तस्मै प्रतिपादयितुमर्थयामास। पद्मावत्यपि कृतदूतसंपातेन प्रद्योतसुतेन सम्बन्धमनिच्छन्ती, मृतामपि प्रियामनुस्मृत्य दारुणां वियोगदशामनुभवन्तं, सानुक्रोश इत्युदयनमेव भर्तारं मनसा चकाङ्क्ष। अमात्यानां

निर्बन्धवशाद्वत्सेशो दर्शकसम्बन्धमनुमेने । अथासन्नविवाहस्स दर्शकगृहानुपागमत् । तत्र च निजविभवोचितं दर्शकेनाभ्यर्चितः पद्मावत्याः पाणिं जग्राह ॥

अथ तस्मिन्नेव राजकुले निवसन्त्याः निजगुणैः पद्मावत्याः परं बहुमतिपदमारूढायाः, अवन्तिकाव्यपदेशाया वासवदत्ताया:, भर्तुः पुनर्विवाह इति महान् हृदयज्वरोऽवर्तत। "अहो, आर्यपुत्रोऽपि नाम परकीयस्संवृत्तः" इति सा दूयमाना शश्वदुत्ताम्यति स्म । विह्वलहृदयायास्तस्या बहुषु वाक्प्रमादेषु आत्मनः स्वरूपं कृच्छ्रगोप्यमासीत् । निरुत्साहा च सा विवाहामोदसंकुलमन्तःपुरं परित्यज्य विजने संविष्टा स्वस्य भागधेयमनुचिन्त्या-खिद्यत । तस्याश्शोकेनान्धीबभूव हृदयम् । अमण्डितशरीरा नीहारप्रतिहतेव चन्द्रलेखा शोक्यदर्शनतामवहत् । निद्रामलभमानायास्तस्याः शय्यायामपि दुःखविनोदनमसम्भावनीयमासीत् । केवलमार्यपुत्रदिदृक्षया विरहनिपीडितानपि प्राणान्दधार ॥

अत्रान्तरे वत्सराजो द्वित्रदिनानि प्रवृत्तनृत्तगीतं प्रमोदमेदुरमुद्वाहमहोत्सवमनुभवन् नवपरिचयहारिण्या पद्मावत्या सहचरितो यथासुखं श्वशुरगृह उवास । परं तु बहुगुणकमनीयापि पद्मावती तेन वासवदत्तां विस्मारयितुं न पारयामास । स तु दक्षिणतया अग्रतः पद्मावतीं रञ्जयन्नपि लब्धैकान्त्यस्सख्या वसन्तकेन सह वासवदत्ताविरहपर्युत्सुकेन मनसा तद्गुणानेव वर्णयन्नास्त । एकदा अलक्षितागते पद्मावती वासवदत्ता च

उपवने तादृशं स्वैरमनयोरालापमुपशुश्रुवतुः । तदा विदूषको-ऽपृच्छत्—"भोः, शून्यं खल्विदं प्रमदवनम् । पृच्छामि भवन्तं किमपि प्रष्टव्यम् । का भवतः प्रिया; तदानीं तत्रभवती वासव-दत्ता, इदानीं पद्मावती वा" इति । अनेन प्रश्नेन बहुमानसङ्कटे पातितः स्वभावदक्षिणो राजा न प्रतिवक्तुं शशाक । किंतु वयस्येन सशपथं बलात्कारेण पृष्टः उदैरयत्—"का गतिः श्रूयताम्—

पद्मावती बहुमता मम यद्यपि रूपशीलमाधुर्यैः ।
वासवदत्ताबद्धं न तु तावन्मे मनो हरति ॥" इति ।

तच्छ्रुत्वा अभिजाता पद्मावती अनसूयन्ती, "सदाक्षिण्यो भर्ता" इति तस्मिन्नधिकतरं पिप्रिये । पत्युरभ्युदयापेक्षया अङ्गीकृतविरहदुःखा वासवदत्ता स्वानपेतं भर्तुर्हृदयमालक्ष्य दत्तवेतनेव परिखेदस्य समाश्वसत् ॥

अनेन परिहासेन स्मृतवासवदत्तावृत्तान्तस्य नवमिव विरहदुःखमनुभवतो राज्ञो नयनं बाष्पायमाणमभवत् । तदा "उत्कण्ठितं भर्तारमवेक्षस्व" इति पद्मावतीमुक्त्वा वासवदत्ता निरगच्छत् । पद्मावत्यपि विदूषकेण नलिनीपत्रेणानीयमानं मुखोदकं तस्य हस्तात्स्वयं गृहीत्वा राजानमुपासरत् । तामुपस्थितां दृष्ट्वा संभ्रान्तो राजा दक्षिणत्वात्—

"इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत् ।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः ॥" इति समर्थयन् अश्रुकारणमित्थं व्याचख्यौ ॥

"शरच्छशाङ्कगौरेण वातावि‌द्धेन भामिनि ।
काशपुष्पलवनेदं साश्रुपातं मुखं मम ॥" इति ।

पद्मावती तु तस्य दाक्षिण्येन तुतोष । ततो जामातरमग्रतः कृत्वा मगधराजस्य सुहृज्जनं द्रष्टुं योग्यः अपराह्णकालः समुपस्थित इति पद्मावतीमापृच्छ्य सवयस्यो वत्सराजो राजसभामभिप्रतस्थे ॥

अथान्येद्युर्निशायां शीर्षवेदनया दुःखिता पद्मावतीति तस्याः समुद्गृहके शयनीयं रचितमासीत् । तत्र तां वेदनायाः सह्यतां प्रष्टुं सवसन्तको राजा गतः । गत्वा च अव्याकुलप्रच्छदामक्लिष्टोपधानामास्तृतसमां शय्यामालोक्य न तावदागता पद्मावतीत्यनुमिमानो राजा मुहूर्तं प्रतिपालयामीति तामेव शय्यामधिशिश्ये । शयानश्च निद्राहेतोरुज्जयिनीसम्बद्धां कामपि कथामुपक्रममाणे वयस्ये, हुतवहोपहारीभूतामवन्तिराजतनयामनुस्मरन् विरहातुरस्सशोकमित्थं विललाप ॥

"स्मराम्यवन्त्याधिपतेस्सुतायाः
प्रस्थानकाले स्वजनं स्मरन्त्याः ।
बाष्पं प्रवृद्धं नयनान्तलग्नं
स्नेहान्ममैवोरसि पातयन्त्याः ॥

अपि च—

बहुशोऽप्युपदेशेषु तया मामीक्षमाणया ।
हस्तेन स्रस्तकोणेन कृतमाकाशवादितम् ॥" इति ।

अनेन व्याक्षेपेणावघट्टितशोकशल्यं राजानं प्रेक्ष्य विदूषकोऽन्यां कथां कथयितुमारेभे । कथयति चास्मिन् शनैरुदयनो निद्रापरवशो बभूव । सुप्तं तमवगत्य, "अतिशीतलेयं वेला, प्रावारकं गृहीत्वा आगमिष्यामि" इति विदूषकोऽपि निर्गतः ॥

क्षणेन, अस्वस्थां पद्मावतीं कथाभिर्विनोदयितुमाकारिता अवन्तिका समुद्रगृहकं प्रविश्य मन्दया दीपप्रभया सुप्तं राजानं पद्मावतीं मत्वा शयनसंविभाग उपविश्य सस्नेहं परामृशन्ती परिषस्वजे । तदा राजा उत्स्वप्नायते स्म—"हा वासवदत्ते, हा प्रिये, हा प्रियशिष्ये ! देहि मे प्रतिवचनम्" इति । तच्छ्रुत्वा, "आर्यपुत्रः खलु, न तावत्पद्मावती" इत्यवधार्य वासवदत्ता सरभसमुदतिष्ठत् । आशशङ्के च नितान्तचकिता सा साध्वी—"किं नु खलु दृष्टास्मि । महान्खल्वार्ययौगन्धरायणस्य प्रतिज्ञाभारो मम दर्शनेन निष्फलस्संवृत्तः" इति । पुनस्तद्वदेव विलपन्तं समीक्ष्य च समाश्वसत् । "दिष्ट्या स्वप्नायते खल्वार्यपुत्रः" इति । ततः, "नात्र कोऽपि जनः । यावन्मुहूर्तं स्थित्वा दृष्टिं हृदयं च तोषयामि" इति सकरुणस्नेहं भर्तारं निध्यायन्ती तत्र क्षणमवतस्थे । अथ भूयोऽप्युत्स्वप्नायमानो राजा कुपितामिव प्रियां प्रसादयन् हस्तौ प्रसारयामास । यौगन्धरायणमननुज्ञाप्य

स्वप्रकाशनमनिच्छन्ती सा साध्वी—"चिरं स्थिताऽस्मि । कोऽपि मां पश्येत् । तद्गमिष्यामि" इति मत्वा प्रतिष्ठमाना शय्यावलम्बितं राज्ञो हस्तं शयनीय आरोप्य सत्वरं निरगात् ॥

अथ स्पर्शविशेषेण प्रबुद्धो राजा सहसोत्थाय "वासवदत्ते, तिष्ठ, तिष्ठ" इत्यनुधावन् सम्भ्रमवशात् द्वारपक्षेण ताडितो व्यषीदत् । तदानीं व्यामुग्धस्स प्रियादर्शनं स्वप्नं वा भ्रमं वा भूतार्थं वा न परिच्छेत्तुं शशाक । उपसृत्य च वसन्तकस्तं, "असम्भावनीयमेतत्; चिरात्खलूपरता वासवदत्ता । सन्ततं तामेव चिन्तयतस्तव स्वप्नविभ्रमोऽयं भवेत् । अथवा अस्मिन्राजकुले अवन्तिसुन्दरी नाम यक्षिणी प्रतिवसति; सा त्वया दृष्टा भवेत् ।" इत्युपजहास । तं प्रत्याययन्नाह हर्षविषादविह्वलान्तरङ्गो राजा—"न न,

स्वप्नस्यान्त विबुद्धेन नेत्रविप्रोषिताञ्जनम् ।
चारित्रमपि रक्षन्त्या दृष्टं दीर्घालकं मुखम् ॥

अपि च, वयस्य, पश्य पश्य—

योऽयं सन्त्रस्तया देव्या तया बाहुर्निपीडितः ।
स्वप्नेऽप्युत्पन्नसंस्पर्शो रोमहर्षं न मुञ्चति ॥" इति ॥

अथ च यथा यथा चिन्तयति स्म तथा तथा दृढतरं स वासवदत्तां म्रियमाणामज्ञासीत् । कदाचित्सा प्रकाशमेष्यतीति मनोरथमुल्लिलेख च ॥

ततो निर्वृत्ते विवाहमङ्गले, सपरिवार उदयनः अवन्ति-कामुखसखीजनानुगतया पद्मावत्या सह पर्युत्सुकप्रकृतिमण्डलाभि-नन्दितागमनः स्वराजधानीं प्रतिनिववृते । अत्रान्तरे रुमण्वान् दर्शकसाहाय्येन समाहृतं महद्बलमाकर्षन्नारुणिमाभिमुखीभूयाभि-हत्य च सङ्गरे, तदपहृतं वत्सराज्यं राज्ञे प्रत्यानिनाय ॥

राज्यलाभप्रवृद्धोदयोऽप्युदयनः कदाचित्, "नर्मदातीरे गुल्मलग्ना दृष्टा" इत्युपनीतायाः वासवदत्ताङ्कोपलालितायाः घोषवत्या दर्शनेन प्रतिबोधितविरहव्यथः, "तां तु देवीं न पश्यामि यस्या घोषवती प्रिया" इति विलपन् नितरामतप्यत ॥

एवं गते, महासेनः उपरतां दुहितरं तद्विरहेण दुःखितं जामातरं च श्रुत्वा तस्योत्कण्ठाविनोदार्थं, यत्र चित्रफलके पूर्वं वासवदत्तामालिख्य विवाहो निर्वर्तितः तं वासवदत्ताधात्र्या हस्ते समर्प्य सकाञ्चुकीयां तां प्रेषयामास । धात्रीकाञ्चुकीयौ वत्स-राजस्सबहुमानं महासेनस्य देव्या अङ्गारवत्याश्च कुशलमन्वयुङ्क्त । काञ्चुकीयस्सर्वगतं कुशलं निवेद्य परापहृतस्य राज्यस्य प्रत्यानय-नेन वर्धमानं महासेनवचसा उदयनमभिनन्दयामास । धात्री चाङ्गारवत्याः प्रेमानुशयकरम्बितं सन्देशमचकथत् । तदा महा-सेनाङ्गारवत्योः कन्यापहारिणि स्वस्मिन् तस्यामप्युपरतायामनिवृत्तां स्वीयत्वसम्भावनां निरीक्ष्य शोकानुतापलक्ष्यहृदयो वत्सराजस्तां परिणतिमनुचिन्त्य वैक्लव्यमगमत् । तं पर्यवस्थापयन्नाह काञ्चुकीयः —"उपरताप्यनुपरता महासेनपुत्री एवमनुकम्प्यमाना भर्त्रा ।

अथवा—

कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति ।
एवं लोकस्तुल्यधर्मा वनानां
काले काले छिद्यते रुह्यते च ॥" इति ॥

तदानीं तस्य चित्तविनोदनार्थमुपप्रेषितं आलिखितवासवदत्ताप्रतिच्छन्दं चित्रफलकं तस्मै धात्री उपानयत् । तत्सबहुमानं राज्ञा सह निर्वर्णयन्ती पद्मावती प्रहृष्टोद्विग्ना सप्रत्यभिज्ञमाह—"आर्यपुत्र, अस्याः प्रतिकृत्यास्सदृशीह प्रतिवसति । या किल मम कन्याभावे केनापि ब्राह्मणेन स्वभगिनिकेति न्यासतया निक्षिप्ता" इति । तदा, "किमियं वासवदत्ता भवेत् उत विप्रस्य भगिन्येव । यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति । अथवा, दृश्यते खलु परस्परगतं रूपसादृश्यं लोके ।" इति विचिकित्सति राजनि, यौगन्धरायणो यवनिकान्तरित उपसद्य न्यासप्रत्यर्पणं पद्मावत्या अयाचत । राजा चावन्तिकामानाययामास ॥

ततः परकलत्रदर्शनं परिहरन् उदयनः साक्षिमान् न्यासो निर्यातयितव्य इति वासवदत्ताधात्रीं काञ्चुकीयं च तत्राधिकरणं कल्पयामास । धात्री त्ववन्तिकां निर्वर्ण्य "अहो भर्तृदारिका वासवदत्ता" इति साश्चर्यमाचक्रन्द । तदा सम्भ्रान्तो राजा "कथं महासेनपुत्री । तत्प्रविशत्वभ्यन्तरम्" इत्याजिज्ञपत् ।

यौगन्धरायणस्तु "न खलु न खलु प्रवेष्टव्यम् । मम भगिनी खल्वेषा । भो राजन्—

भारतानां कुले जातो विनीतो ज्ञानवाञ्छुचिः ।
तन्नार्हसि बलाद्धर्तुं राजधर्मस्य देशिकः ॥" इत्याचिक्षेप ।

"भवतु, पश्यामस्तावद्रूपसादृश्यम्" इति वदन् राजा यदा यवनिकां संक्षेपयामास तदा यौगन्धरायणो वासवदत्ता चोपसृत्य राज्ञो जयमुदीरयामासतुः । तौ च पश्यन्नुदयनः किन्नु सत्यभिदमुत स्वप्न इति विस्मयमानः परिषस्वजे ॥

ततो यौगन्धरायणस्तस्य पादमूले पतित्वा "स्वामिन्, देव्यपनयनेन कृतापराधः क्षम्यतामयं जनः" इति प्रार्थयामास । तमुत्थाप्य प्रहृष्टो वत्सराजस्सप्रेमाश्रु सगद्गदमिदमुदैरयत्—

"मिथ्योन्मादैश्च युद्धैश्च शास्त्रदृष्टैश्च मन्त्रितैः ।
भवद्यत्नैः किल वयं मज्जमानास्समुद्धृताः ॥" इति ॥

पद्मावत्यपि सखीजनसमुदाचारेण दूषितां वासवदत्तां शीर्षेण प्रसादयामास ॥

अथ यौगन्धरायणः स्वनीतिप्रयोगमान्तं राज्ञः स्पष्टीचकार । स्वयमेवैतत्कुशलं महासेनाय निवेदयितुं सधात्रीकाञ्चुकीयो राजा उज्जयिनीं ययौ । एवं सर्वकार्यधुरन्धरेण यौगन्धरायणेन प्रत्यवेक्षितयोगक्षेमो वत्सराजः वासवदत्ता-पद्मावतीभ्यां सह यथामनोरथं रममाणस्सुचिरं मुमुदे ॥

॥ अथाविमारकचरितम् ॥

वैरन्त्यनगरेशितुस्सुयोधनात्मजस्य राज्ञः कुन्तिभोजस्य निरवद्यपेशलाङ्गी कुरङ्गी नाम समग्रैर्निजरूपगुणैरसमाना भासमाना दुहिता समास्त । बहवस्तां स्वस्वतनयनिमित्तमर्थयमाना राजानः कुन्तिभोजाय दूतसंप्रेषणमकार्षुः । तत्र च कन्यापित्रा सौवीरराज-काशिराजौ स्वभागिनीपती सम्बन्धयोग्याविति चिन्तितौ । अनयोरपि मध्ये देवीभ्रातृत्वेन सौवीरेन्द्रो गुणाधिक इति तत्पुत्रं विष्णुसेनमेव जामातृत्वेन वरीतुं राज्ञो मनीषा आसीत् । परं तु स प्रथममेव पुत्रस्य कारणात्प्रेषितदूतः, "अतिबाला वर्तते कन्या" इति व्यपदिश्य, "समयः प्रतिपाल्यताम्" इति प्रतिसन्दिष्टः पुनरपि काले दूतप्रेषणं नाकार्षीत् । चारपुरुषैश्चावधारितं, यत्सौवीरराजस्सपुत्रदारः किमप्यदर्शनीयतां गतः ; अमात्याः कार्याणि वर्तयन्ति स्मेति । एवं गते तत्कालसन्निहितः काशिराजदूतः राज्ञो विशेषतः पक्षपातपात्रमभूत् ॥

अत्रान्तरे कदाचित्सपरिजना राजदुहिता गत्वोद्यानं यथासुखमाक्रीड्य च निवर्तमाना दासीदासहसितकथितश्रवणबृंहित-

मदेन निपातितनिहतसादिपुरुषेण क्षितिरजोऽवगुण्ठिताव्यक्त-मूर्तिना बन्धनपरिभ्रष्टेनाञ्जनागिरिनाम्ना मत्तहस्तिना अभिमुखी-भूय परित्रासिता। अथ प्रद्रुतेषु प्राकृतजनेषु हाहाकारमात्र-प्रतीकारासु स्त्रीषु कश्चिद्दर्शनीयाकृतिर्दाक्षिण्यवांस्तरुणः हस्तिना-ऽभिभूयमानायै तस्यै अभयं प्रदाय निर्विशङ्कमासादितवांस्तं द्विपवरम्। ततस्स ललितकरतलताडनप्रकोपितमेनं स्वस्मिन्नाभि-मुख्याकृत्य सुदूरमपवाह्य मुहूर्तमनादरतः प्रियवयस्येनेव तेन व्यालेन निवर्तनानुवर्तनैर्गतिविशेषैः तं विमोहयन् चिक्रीड। अथ राज्ञो मन्त्रिभिर्हस्तिनीभिरुपलभ्य गजशालां प्रवेशितेऽञ्जनगिरौ निवृत्त-स्स पुरुषः लज्जित इव तेन कर्मणा महाजनप्रशंसामसहमानः समवनतशिरस्कः स्वमेवावासं गतः॥

तस्य चान्त्यजं स्वमपदिशतः प्रकृतिमन्वयं च परीक्षितुं भूतिकनामा कुन्तिभोजामात्यो व्याप्रियते स्म। परीक्ष्य च याव-दुपलब्धमित्थं समर्थयामास।—'नायमन्त्यज इति प्रत्येतुं शक्यम्। केनापि कारणेनात्मानमन्वयं चाच्छादयति। यद्येवं मानुषदुर्लभेन रूपेण विप्रनिर्विशेषेण भाषितेन क्षात्रेण तेजसा कुलीनोचितया च सानुक्रोशतया सोऽन्त्यजो भवेत्, व्यर्थोऽस्माकं शास्त्रमार्गेषु परि-श्रमः। दृष्टश्च तत्रभवान् सत्पुत्रसम्पन्नस्तातपिता। स हि व्यायाम-दृढविपुलोच्छ्रितांसः ज्याघातकिणाङ्कितप्रकोष्ठः प्रभानुमेयो मेघा-न्तर्गतो रविरिव प्रच्छन्नोऽप्यनुभावलक्ष्यराजभावः विसंवद-त्यात्मनो व्यपदेशमाकृतिमहिम्ना" इति। तस्माच्च श्रुताखिल-

वृत्तान्तो राजा बहुमानाश्चर्यहर्षाकुलः "परार्थमनवेक्षितशरीरो लोकोत्तरसत्वस्स उदारकर्मा महापुरुषस्तत्वतः कीदृशो भवेत्" इति विचिकित्सन् मन्त्रिणः पुनरपि निपुणं परीक्ष्यावधारयितुमादिदेश ॥

वस्तुतस्त्वसौ युवा विष्णुसेन एव; यः काशिराजमहिष्यां सुदर्शनायामग्निदेवेनोत्पादितः, तया च सद्योमृतप्रसवायाः स्वभगिन्यास्सौवीरेन्द्रपत्न्या रहस्समर्पितः । यश्चामानुषवीर्यबलो बाल एव सर्वलोकोत्सादनकेलीकुतूहलमविरूपधारिणमसुरं मारयामासेति अविमारकनाम्ना पप्रथे । स किल चण्डभार्गवनाम्नो महर्षेरशापमहिम्ना वर्षभोग्यं चण्डालच्छद्मना प्रच्छन्नवासं प्राप्नवतः पितुः प्रत्यनन्तरीभवन् कुन्तिभोजस्य नगरोपान्तमध्युवास ॥

तस्मिंश्च हस्तिसंभ्रमदिवसे यदा स्वविक्रममाविष्कुर्वन्नसौ सर्वानवद्याङ्गीं कुरङ्गीं दृष्टवान् तदा प्रभृत्येवोपारूढमदनः भृशमुन्मनायमानोऽन्यादृशः संवृत्तः । तस्यानन्यरतेश्चेतोहारिणीं तां हरिणीदृशं सङ्कल्पशतैरुल्लिखतः कल्पकल्पं दिवसमपि कृच्छ्रेण क्षिपतस्सन्तुष्टनाम्नोऽवस्थासहायस्य निजवयस्यस्यापि गोष्ठी न चित्तविनोदाय प्रबभूव । तामेव च हस्तिकरशीकरशीतलाङ्गीं भयाकुलविलोलविषण्णनेत्रां बालां स्वप्नेषु नित्यमुपलभ्य पुनर्विबुद्धो जातिस्मरः प्रथमजातिमिवोत्कण्ठाविक्लवस्समार । "अहो तस्या रूपसम्पत्, रूपानुरूपं यौवनं, यौवनसदृशं सौकुमार्यम् । किंन्वियं असामान्यसुन्दरीजनसर्गप्रतिच्छन्दो विधातुः । किंन्वियं

सा पद्मा, पुरुषोत्तमं विहायेहावतीर्णा। अहो सर्वेषां स्त्रीगुणानामेकत्र समवायः।" इत्येवं चपलस्याविजय्यस्य मनसः पारतन्त्र्यमुपगम्य सततं ध्यायन्नास्त ॥

राजदुहितापि प्राणदातुस्तस्य दर्शनक्षणोद्भिन्नेन सङ्कल्पयोनिना क्षिप्रमप्रतीकारां कामापं दशां समारोपिता नेच्छति स्म मण्डनं, नाहारमाद्रियते स्म, न रेमे सखीजनेन, दीर्घं निश्श्वास, विविक्ते रुरोद, असम्बद्धमकथयत्, कथितं नाभिजज्ञौ, रोगमपदिदेश, तन्वी बभूव, पाण्डुतामगच्छत्। गूढामिङ्गितवेदिभिस्सखीजनैरनङ्गतापपिशुनान्यवस्थान्तराण्युपलक्ष्य रहसि परिपृष्टापि सा लज्जया भयेन कुलमानेन बालभावेन चैकस्या अपि किंचिन्नावोचत् ॥

एवमतिशोचनीयामवस्थामकुलीनं कमपि युवानमन्तरेण वामशीलेन मदनेनानुप्रापितां कुरङ्गीमनुकम्पयन्त्यपि राजकुलदूषणाद्बिभ्यती सनलिनिका धात्री, यदा अशक्यप्रतीकारामापदमेनां मत्वा खिद्यते स्म तदा, "कुलगतशङ्कां त्यक्त्वा साध्यतां यथेप्सितम्। कुलं चास्य प्राप्तकाले श्रोष्यसि" इति अशरीरा कापि वाणी समुललास। सञ्जातप्रत्यये च ते प्रहृष्टे सत्वरमविमारकमुपगम्य चतुरैर्वचनोपन्यासैः कुरङ्ग्यास्तत्समावस्थतां बोधयित्वा तस्यामेव निशायां गूढं कन्यापुरं प्रवेष्टुं तमभ्यचोदयताम् ॥

स चौषधमुपलभ्येवातुरः प्रमुदितमनाः धात्र्यास्सकाशादवधारितराजगृहसन्निवेशः, "प्रतीक्ष्यतामर्धरात्रः" इति तां

विसृज्य अस्तमिते गभस्तिमति वयस्येन सन्तुष्टेन सह गुरुजनालक्षितो वासगृहान्निष्क्रम्य नगरं प्राविशत् । तत्र च यावत्प्रदोषापगमं कुत्रचित्कालं प्रतिपाल्यानन्तरं, "बहुदोषो रात्रौ छन्नः परगृहप्रवेशः । मा भवान् जीवग्रहणमुपगच्छतु विषमशीलानां कुन्तिभोजामात्यानाम् ।" इति स्नेहात् दर्शितशङ्काकातर्यं मित्रं ब्राह्मणं कथञ्चिदनुमान्य विरचितचोरवेषः खड्गं रज्जुं चादाय पिण्डितान्धकारभीमं रथ्यामार्गमवातरत् ॥

पर्यटंश्चासौ कौतुकेन कालरात्रिप्रतिभये तस्मिन्नर्धरात्रे, प्रसादोन्मुखविविधलीलावतीविलासमुग्धयुवजनासेवितहर्म्याग्रभूमिकासु प्रकामविशालासु प्रतोलीषु, तत्क्षणसन्धुक्षितहृच्छयार्दितस्त्वरमाणः राजकुलमासाद्य, कपिशीर्षकावबद्धया रज्ज्वा प्राकारमुल्लङ्घ्य यथोद्दिष्टमार्गेण कन्यापुरप्रासादमाससाद । तत्र च जामातृत्वेन निश्चितं काशिराजपुत्रं जयवर्माणं स्वपुरीमेवानेतुं महाराजेन प्रेषितो भूतिकः प्रस्थित इति तद्भृत्यवर्गस्सर्वोऽपि कन्यापुररक्षणे किमप्यव्ययो बभूव । प्रासादोऽपि काष्ठकर्मबहुलतया समासन्नजालवत्त्वाच्चाविमारकस्याक्लेशारोहणीयोऽभवत् । ततो विघट्टितजालयन्त्रस्तद्भवनं प्रविष्टस्स वीरः संहृत्य रौद्रवेषं विमुच्य च कक्ष्याबन्धं निजागमनं प्रतीक्षमाणां नलिनिकामुपासरत् ॥

अत्रान्तरे सखीजनसल्लापेषु जयवर्मणे स्वामुद्दिष्टां निशम्योद्विग्ना, "अहमात्मनः प्रभवामि" इति निश्चिन्वत्यपि, नलिनिका-

मुखात्प्रियजनाभिसरणमवगत्याभिजात्येनाप्रगल्भत्वेन च चारित्र-भ्रंशचकिता किमपि परिप्लवहृदया कुरङ्गी दारुणेन मनोहरेण च मन्मथसन्तापेन कामप्युन्माददशामारोपिता मोहनिद्रामुपगता-ऽऽसीत् । तस्याः पादकमले संवाहयन्ती नलिनिका अविमारकं निशाम्य स्वागतेन प्रत्युद्गम्य च कुरङ्गीशयन उपावेशयत् । ततः किञ्चिदिव प्रबुद्धाऽनङ्गज्वरपरवशा कुरङ्गी शून्यहृदयेन—"नलिनिके, किं तेन निरनुक्रोशेन भणितम्" इत्यालप्य, अनुपदं "हं परिभ्रष्टास्मि" इति भयविह्वलिता संकुचन्ती, अवस्थानुगुणं परिचरन्तीं नलिनिकां सस्नेहबहुमानमालिङ्गितुमिच्छन्ती शयनोपविष्टमविमारकं बलादाकृष्यालिलिङ्ग । बुद्ध्वा च मतिविभ्रमं संभ्रान्ता, "हा धिक्! हीनं चारित्रम्" इति भयेन वेपते स्म । अथ लज्जया परिचयं परिहरन्तीं भयेन विह्वलां अनुरागेण चोन्मुखीं कुसुमपलाशपेशलाङ्गीं कुरङ्गीदृशमेनां ललितसुभगैर्विदग्धोपचारैर्यथासुखं रमयन् अनृणो यौवनस्याविमारकः कियन्तं कालमलक्षितः कन्यापुर उवास ॥

एवमनुरक्तरमणीसंभोगरमणीयं सुखेन संवत्सरमेकं क्षणमिव क्षिपतोऽस्य विधिना निर्भरमसूयतेव महानन्तरायस्समुपस्थापितः । को हि नाम लोकेऽस्मिन्नविच्छिन्नधारं सुखसंपातमनुभवितुमर्हति । यदा किल दुहितुर्वृत्तान्तमन्तरेण सञ्जातशङ्कः कलुषितो राजा शुद्धान्तस्य विशेषेण रक्षाविधिं व्यधित्सत, तदाप्रभृत्यविमारकस्य तत्रावस्थानं दुष्करमभूत् । अप्रमग्नपरिचिता-

स्वादां निसर्गभूतैर्निजविलासैः प्रतिक्षणं नूतनामिव हृदयहारिणीं कुरङ्गीं सहसा परित्यक्तुमनीश्वरोऽप्यसौ निजशरीरं कुलमानं च रक्षितुं सद्योऽपसरणमन्तरा किमप्युपायान्तरमपश्यन् अग्निना भगवता पुत्रस्नेहेन प्रच्छादितो गूढं कन्यापुरान्निरगात् ॥

निर्गतश्चाविमारकः अप्रतीकारगुरुकेण विरहसन्तापेन दग्धहृदयस्तामेव प्राणसमामनुभूतमुक्तामसुलभपुनर्दर्शनामनुध्यायन् "नूनं मदपेक्षया सापि प्राणांस्त्यक्ष्यति । तया विरहितस्य मम जीवनं न केवलं दुष्करं किं तु कृतघ्नभावेनापि गर्ह्यते" इति निश्चित्य प्राणपरित्यागेन दुःखसागरं लङ्घितुकामः पर्वतशिखरमारुरोह । स तत्र मदनानलेनान्तर्बहिश्च निदाघसमयप्रचण्डेन चण्डभानुना दह्यमानः सञ्जातमूर्च्छः पतन् किमनेन जीवन्मरणेनेति क्षणमप्यतो दुर्भरं भारभूतमात्मनो देहं कान्तामेवानुस्मरन् दवाग्नौ चिक्षेप । भगवांस्तु विभावसुः मलयचन्दनशीतलो भूत्वा निर्वेदतप्तं निजतनयं ज्वालाभिः परिषस्वजे । तद्दृष्ट्वा विस्मितोऽविमारकः पुनर्भृगुपतनेनात्मघातं कर्तुमयतत ॥

तदानीं कोऽपि विद्याधरो निजकान्तया सह प्रातर्मन्दरकन्दरेष्वामोदितयौवनो हिमवतश्शोभया ततः संप्रलोभितदृष्टिः मध्याह्नसुखावहं शीतचन्दननिलयं मलयमभिप्रस्थितो नभसि प्लवमानस्तस्मिन्नेव पर्वतशृङ्गे विश्रमितुमवातरत् । स कान्तया सह सलीलं तत्र पुष्पापचयं कुर्वन्नमर्त्यनिर्विशेषाकृतिमविमारकं विलोक्य, "किमयं विद्याधरो मन्त्रभ्रष्टः, कुतः खलु रूपमीदृश-

मन्येषाम्" इति चिन्तयन्विस्मयाविष्टः प्रष्टुमुपासदत् । अविमारकोऽपि सहसा तं दृष्ट्वा विस्मितः, "किन्नु खलु स्वप्नो मयानुभूयते । किमुतैतदन्तकाले यन्मनुष्याः पश्यन्ति" इति विशङ्कमानः पुनः स्थिरीकृत्यात्मानं, "भोः कतमकुलान्वयो भवान्" इत्यपृच्छत् । ततो विद्याधरः "श्रूयतां—अहं मेघनादो नाम विद्याधरः । इयं तावदस्मत्कुटुम्बिनी सौदामिनी नाम । अद्य भगवन्तमगस्त्यमाराधयितुं मलयपर्वते विद्याधरैरुत्सवः समारब्धः। तत्रावामपि सङ्केतितौ । इह मुहूर्तं विश्रम्य गमिष्याव इत्यवतीर्णौ। एषोऽस्माकं वृत्तान्तः ।" इति निवेद्य पुनरप्राक्षीत्—"अथ किमर्थमिदानीं भवान् क्षितितलं देवलोकीकरोति । किमर्थमेकाकी चेहागतः" इति । तदानीं "किं नु खलु वक्ष्यामि" इत्याकुलहृदयमधोमुखं तिष्ठन्तमविमारकं प्रेक्ष्य मेघनादः "भवत्वहमेव ज्ञास्यामि" इत्यवधार्य प्रणिधानमास्थितो विद्यामावर्तयामास । विदिताखिलरहस्यश्च भागधेयवैषम्यमुपगते तस्मिन् जातानुकम्पः "सापि च तत्र जीवन्मरणमनुभवति तपस्विनी । अहमनयोरर्थे सहायो भविष्यामि" इति चिन्तयंस्तमभ्यभाषत । "भो अविमारक, सकला च भवतोऽस्माभिरवस्था विदिता । अद्य प्रभृत्यावयोस्सख्यमस्तु । कन्यापुरमज्ञातमेव प्रवेष्टुमस्त्युपायः । गृह्यतामङ्गुलीयकमिदम् । अनेन दक्षिणाङ्गुल्या धार्यमाणेनादृश्यो भवसि । वामाङ्गुल्या प्रकृतिस्थः । अपि चान्तर्हितस्पृष्टस्तत्स्पृष्टश्चान्तर्हितौ भवतः" इति । निदर्शितं च तेनाङ्गुलीयकप्रभाव-

मालोक्याविमारको हर्षाकुलो विसिष्मिये "एते खलु लोके सुखिनो नाम—

ये सञ्चरन्ति गगने वनितासहायाः
क्रीडन्ति पर्वततटेषु कृतोपदेशाः ।
सर्वं विदन्त्यपि च मन्त्रकृतैः प्रभावै-
रन्तर्हिताश्च विवृताश्च सुखं चरन्ति ॥"

इति । ततो गृहीत्वाङ्गुलीयकं, दिव्यं स्वभावं समुपागतं स्वं मन्यमानः, "प्रविष्ट एवास्म्यनेन कन्यापुरं" इति प्रहृष्यन् तमव्याजसुहृदं विद्याधरमभिवन्द्य, "वशीकृतविद्यानां भवद्विधानां किमस्माभिः प्रतिकर्तुं शक्यम् । सर्वथा जीवितसंप्रदानात्क्रीतोऽहं तव भृत्यः" इति अच्छलमुदीर्य स्नेहेनानुबध्यमानं तं दयिता-सहायं यथेष्टगमनाय विससर्ज ॥

अथ नगरगमनाय कृतत्वरस्स पर्वतकटकादवतरन् मध्ये-मार्गं आत्मानमन्वेष्टुं सर्वलोकपरिभ्रमणकृतव्यवसायेन निज-जीवितनिर्विशेषेण परिश्रान्ततया पादपच्छायाप्रसुप्तेन वयस्येन सन्तुष्टेन समगच्छत । उभावप्यङ्गुलीयकप्रभावतिरोहिताकृती कन्यापुरप्रासादमश्रमेण विविशतुः ॥

आनिर्गमनात्प्राणसमस्य सुदूरारूढेन मदनसन्तापेन वि-लुलितायाः कुरङ्गचास्सर्वतो निरुत्सवोऽभूत् जीवलोकः । अथ निदाघान्ते प्रवृत्ते वियोगिदारुणे वर्षासमये तत्कालवल्लभैर्बकुल-सरलसर्जार्जुनकदम्बनीपतिन्दुकप्रभृतिभिस्सखीजनानीयमानैस्सु—

रभिभिस्सुमनोभिरुन्मादिता, निदर्शिततारुण्डवपाण्डित्यैरिशखण्डि-भिरुद्विग्ना, सुशिक्षितशारिकोपक्रान्तवृत्तान्तकथनमपि शल्यवेधं मन्वाना, स्वनिर्वेदमजानतो रोगावस्थां प्रष्टुमागतस्य परिजनस्य चासकृन्निर्बन्धमसहमाना, विविक्ते यावच्छक्यं हृदयविलोभन-मिच्छन्ती सा नलिनिकाद्वितीया प्रासादशिखरमारुरोह ॥

तत्रापि पुनर्विद्युत्प्रदीपेन कालमेघेनोत्रासिता, निर्दयेना-नङ्गेन संगलपितैः कुसुमसुकुमारैरङ्गकैस्सीदन्ती, निश्वासमात्रलक्ष्य-जीविता, सव्यकरालम्बितमुखकमला, अश्रुपूर्णनयना निश्चलोर्ध्व-दृष्टिर्निध्यायन्ती, "किमनेन जीवन्मरणेन" इति निर्वेदात् प्राणपरित्यागव्यवसितमतिः, चरमं सखीप्रणयं कर्तुकामा सापदेशं नलिनिकामालिङ्गन्ती, "शीघ्रमाकाशतोयस्नानमुपकल्पय" इति सव्याजमुक्त्वा निर्गन्तुं व्यसृजत्। अथ च मातुर्वचनेन, "कीदृशी संप्रति शीर्षवेदना" इति प्रष्टुमागतां हरिणिकां, "निवेदय भट्टिन्यै अद्य विगतरोगा स्वस्था भवतीति" इत्युक्त्वा प्रतिनिवर्त्य, पश्यति निगूढं शङ्कःकुले ससन्तुष्टेऽविमारके, दीर्घमुष्णं निश्वसती, साश्रु-नयना, त्रासविलोलं परितो मुहुर्वीक्षमाणा, उत्तरीयवसनमात्मनः कण्ठ उद्बध्य यथाव्यवसितं कर्तुमयतत ॥

अथ तस्मिन्नवसरे सहसोत्थितं मेघस्तनितं श्रुत्वा संत्रास-वेपिताङ्गी सा कुरङ्गदृक् परित्रातारं शब्दायमाना विह्वला भूमौ पपात। तत्क्षण एवाविमारकोऽङ्गुलीयकं वामाङ्गुल्यां प्रक्षिप्य सरभसमुपासीदन्, "कान्ते, न भेतव्यं, न भेतव्यं" इति

तामुत्थाप्याश्वासयामास । उवास च पुनरन्तःपुरेऽलक्षितचरो-ऽविश्लिष्टकामिजनोपभोग्यं जलदसमयं निर्विशन् नवनवैर्हरिणी-दृशो विभ्रमविशेषैः कृतार्थीकृतमनसिजः ॥

अत्रान्तरे, दुहितुरुद्वाहमन्तरेणानारतं चिन्तयाऽऽयस्यमानः कुन्तिभोजश्चिरेणापि सौवीरराजकुटुम्बकप्रवृत्तिमलभमानः काशि-राजपुत्राय जयवर्मणे कन्यकां प्रतिश्रुत्यामात्यभूतिकेन सजननीकं तमानाय्य राजकुलेऽवस्थापयामास । उद्दिष्टश्चाभवदव्यवहित-श्शोभनो दिवसस्सांवत्सरिकैः । महिषी तु पुनर्निजसोदरसूनो-र्विष्णुसेनस्य वार्तामज्ञात्वा जयवर्मणे दारिकां दातुं नेच्छति स्म ॥

एवं गते, सौवीरामात्यैः कुन्तिभोजाय सन्दिष्टम्—"अस्माकं स्वामी युष्मन्नगरे सपुत्रदारस्संवत्सरमेनं प्रतिवसतीति गूढपुरुषैरवगम्यते । तत्परीक्ष्यताम्" इति । अथान्वेषणे कृते सभूतिकस्य राज्ञश्चरितसंवत्सरव्रतत्वात्सुचेतनाद्वितीयस्सौवीरेन्द्रः प्रकाशतामयासीत् । आबाल्यादुपचितवयस्यभावयोरनयोश्चिरस्य समागमेन प्रहृष्टयोरपि तस्मिन्वत्सरे किमप्यदृश्यतां गतस्वा-विमारकस्य चिन्तया बलवती मन्युपीडा समजायत । तदा पुत्र-स्नेहविक्लबो विषण्णस्सौवीरराजो निजवयस्यं प्रत्यभाषत—"अनु-पमबलवीर्यरूपशाली यद्यविमारकोऽद्य तव चरणरजोरञ्जितालकः प्रणतिं कुर्यात् को नु स्यान्मद्विशिष्ट इदानीं भुवनतले । स्निग्धस्य भवतो दर्शनेन समुद्वलतीव बाष्परूपेण हृदयस्थो मम शोकः । हर्षकालेऽप्यस्मिन्नतश्चेतो न मे प्रसीदति । क्रियतां यथाशक्ति

चारपुरुषैः परितो विचयनम्" इति । भूतिकस्तु "सुपरीक्षितास्सर्वे चारगोचरा देशाः । न क्वापि दृश्यते कुमारः । नूनं स मायामनुतिष्ठतीति प्रतिभाति ।" इति सवितर्कं न्यवेदयत् ॥

एवमप्रतिपत्तिमूढे ताम्यति राजकुले स भगवान् विघटनघटनापटुर्नारदः सुयोधनकुले वत्सलतया विशेषतः कुन्तिभोजेऽप्यनुकम्पित्वेनाविर्भूय प्रतिगृह्य च भक्त्युपपादितं सत्कारं व्याकुलयोस्सौवीरराजकुन्तिभोजयोरन्तःपुरस्थं कुरङ्गीरमणं कुमारमाचचक्षे । तदा, "लज्जित इवास्म्यनेन वृत्तान्तेन । केन दत्ता, कुतः पारेचयः, कथं चायं प्रविष्टः कन्यापुरम् ।" इति अपवादभयाद्विमनायमानं कुन्तिभोजमाह महर्षिः—

"दत्ता सा विधिना पूर्वं दृष्टा सा गजसंभ्रमे ।
पूर्वं पौरुषमाश्रित्य प्रविष्टो मायया पुनः ॥" इति ।

अथ महर्षिणैवानुमोदिते स्वदुहितुर्गान्धर्वविधिना विवाहे कुन्तिभोजो निष्प्रतिवचनो बभूव । परं तु "त्वत्पुत्राय जयवर्मणे कन्या प्रदीयत इत्यानीता सुदर्शना कथं समाधातव्या" इति पृच्छति कुन्तिभोजे, नारदस्सुदर्शनां रहस्याहूयेत्थमबोधयत्—"ननु स्मरस्यविमारकोऽप्यग्निदेवादुत्पन्नोऽग्रजस्ते सुतः । अमानुषबलवीर्योऽसौ हस्तिसंभ्रमदिवसे कुरङ्गीं दृष्ट्वा जाताभिलाषः प्रथमं पौरुषमाश्रित्य तदनु मायया च तया सङ्गम्याभिरमते । कथमिदानीं ज्येष्ठपत्नी कनीयसे दीयते । सुदर्शने! अभिधीयतां

काशिराजाय, जयवर्मणः कुरङ्गी वयसाधिकेति । नन्वस्ति कुरङ्ग्याः कनीयसी सुमित्रा नाम । सा जयवर्मणो भार्या भविष्यति" इति । सुदर्शनापि परितुष्टा तदभ्युपजगाम ॥

अथ महर्षिवचनात् स्वजनपरितोषणार्थमभ्यन्तरसमयमात्रमनुरुध्योपाध्यायेन कारितविवाहमङ्गलं सौवीरराजसूनुं कुरङ्ग्या सहानाययामास कुन्तिभोजः । सपत्नीकोऽविमारकस्सलज्जमुपसर्पन्महर्षिं गुरुजनं च यथाक्रममभिवाद्य तैरप्याशीर्भिरभिनन्दितः परमां मुदमवाप । ततो नारदः "विसृज्यतामचिरेण सौवीरराजः स्वदेशगमनाय । जयवर्मणे च सुमित्रा प्रदीयताम्" इत्यादिश्यानुगृह्य च सर्वान् यथेष्टगमनायोदतिष्ठत् । एवं देवर्षेरनुग्रहपूतं सर्वं राजकुलमुत्सवसंकुलमभूत् ॥

॥ अथ चारुदत्तचरितम् ॥

आसीदुज्जयिन्यां कश्चिदभिरामगुणोपश्रुतमहिमा रूपयौवनशाली विप्रकुलोद्भवश्चारुदत्तो नाम श्रेष्ठिचत्वरे प्रतिवसन्सार्थवाहपुत्रः । स च समुद्रयानव्यतिकरोपार्जितापरिमितार्थसञ्चयोऽपि वादान्यकेन बन्धुमित्रातिथियाचकेषु व्ययितविभवसारो दरिद्रस्समपद्यत । ऋद्धिमनुभूय परिक्षीणस्य दुःखवाह्याऽभवत्तस्याकिञ्चिन्यदशा । उदारमतिस्स कुलपुत्रः पारितोषिकप्रदानस्थानेषु मोघीकृतनिजमनोरथप्रसरो निःस्वतया नितरां सन्दानित इव विव्यथे । तदुपकारलब्धोदयमपि सर्वं मित्रमण्डलं शनैरपचितफलात्तस्मादपससार । परं तु तस्य दरिद्रजनदुर्लभं भार्यानुकूल्यं, सुहृदो मैत्रेयस्य सर्वात्मनानुवृत्तिः, अपरिभ्रष्टसत्त्वता चेति समुदितं भाग्यत्रयं सन्तापोच्छित्तये प्रबभूव । लाघवकारिणीमपि रिक्तदशामनुभवन्नसावभङ्गुरावदातैर्निजगुणैस्सर्वोज्जयिनीजनाह्लादनमाततान यशोवितानम् ॥

स कदाचित्कामदेवानुयानावसरे वसन्तसेनां नाम युवजनोन्मादिनीं ललामभूतामुज्जयिन्याः प्रतिनवयौवनोन्मेषमधुरां

गणिकादारिकां दृष्ट्वा मनसिजशरशरव्यतामयासीत् । परं तु दुर्विधस्यात्मनो गणिकानुरागमाधिमात्रहेतुं पश्यन् यत्नतः प्रतिबध्यानङ्गतारल्यं प्रच्छन्नेङ्गित आस्त । तां च शकारो नाम राज्ञ्यालकः, नृपश्वुरपि, लक्ष्मीमदेनानुकूलयितुं बहुधा प्रायतत । आभिजात्येन केवलं, न पुनर्वृत्तेन, गणिका, वसन्तसेना, श्रियोऽविमुह्यन्ती, तमकुत्सयत । अकामयत चानन्यमनसा शीलपरितोषिणी सुगृहीतनामधेयं चारुदत्तमेव ॥

अथैकदा. षष्ठ्यां, नृत्तावसाने, स्वगृहमुपावर्तमानां तां गणिकां, निशामुखन्नयदालोके पुरमार्गे, विटं पुरस्कृत्यानुधावन्नभिकश्शकारः, अरुन्तुदैरसंबद्धैरनुचितप्रलापप्रायैरनुनयवचनैः प्रसादयितुमारेभे । "अयि वसन्तसेने, तिष्ठ तिष्ठ । अङ्गारमध्यपतितमिव चर्मखण्डं कामेन संप्रति दह्यते मे शरीरम् । सपट्टेन शीर्षेण त्वां प्रसादयामि । भर्तृपुत्रोऽहं कामयितव्यः । अन्यथा दुश्शासनस्सीतामिव केशेषु गृहीत्वा त्वामाहरामि । अथवा तीक्ष्णेनासिना शीर्षं ते च्छित्त्वा त्वां मारयामि । विलपन्तीमपि कस्त्वां परित्रास्यते । किं शवपत्तनेशो वासुदेवः कुन्तीसुतो जनमेजयो वा ।" इति । मूर्खमेनमनुवदन्विटोऽपि, उद्विग्नच्चलदृष्टिं, सर्वं परिजनमालप्यासन्निहितं दृष्ट्वा, "एकाकिन्यां मयि किमकार्यमेतौ पापौ न करिष्यतः" इति भयेन विह्वलां, व्याघ्रानुसारचकितामिव हरिणीं पुरःपुरः पलायमानां, वसन्तसेनां, दर्शितक्रूराध्यवसायैरनुनयेऽपि त्रासकृद्भिः वचोभिरित्थमभ्यर्थयामास ॥

"तरुणजनसहायश्चिन्त्यतां वेशवासो
विगणय गणिका त्वं मार्गजाता लतेव ।
वहसि हि धनहार्यं पण्यभूतं शरीरं
समनुपचर भद्रे सुप्रियं चाप्रियं च ॥
जनयति खलु रोषं प्रश्रयो भिद्यमानः
किमिव च रुषितानां दुष्करं मद्विधानाम् ।
अनुनयति समर्थः खड्गदीर्घः करोऽयं
युवतिवधघृणाया मां शरीरं च रक्ष ॥" इति ।

तदा अनिच्छन्तीं निर्बध्नतोरनयोरनयमसहमानेव अपहृतचक्षुस्सामर्थ्या रथ्याभ्यन्तरपिण्डीभूता तामसी समजृम्भत । तेन हि वसन्तसेनामपश्यन् शकारः प्राह—"भाव, नष्टा वसन्तसेनिका। कदाचिदुपान्तिकस्थं नयनमात्रसंस्थुलस्य दरिद्रचारुदत्तस्य गृहं प्रविशति दुष्टदासी । तदन्विष्य गृह्यताम्" इति । तच्छ्रुत्वा "महदुपकृतं सूचितप्रियगृहसामीप्येनामित्रेणाप्यनेन वैधेयेन" इति आश्वसती वसन्तसेना स्पर्शालक्ष्यघटनं चारुदत्तगृहद्वारमासाद्य निभृतं स्थिता ॥

तदानीं चतुष्पथे मातृभ्यो बलिमुपहर्तुं वयस्येन प्रेषितो मैत्रेयः चेट्या रदनिकयाऽन्वीयमानो दीपहस्तो निष्क्रमिष्यन् द्वारमुदजीघटत् । अपावृत एव पक्षद्वारके वसन्तसेना पटान्तेन दीपं निर्वाप्यान्तः प्रविष्टा । तदा तत्क्षणोच्चलितरथ्यानिलस्यैव दोषं वर्णयन् मैत्रेयः पुनः प्रज्वलयितुं दीपमभ्यन्तरचतुश्शालं प्रविवेश ।

अत्रान्तरे निष्क्रामन्ती रदनिका वसन्तसेनाबुद्ध्या शकारेण केशेषु गृहीत्वा बलादाकृष्य भर्त्स्यमाना चुक्रोश । सदीपके च प्राप्ते मैत्रेये वसन्तसेनाविप्रलब्धस्यात्मनोऽविमृश्यकारित्वं बुद्ध्वा दैन्यसंकुचितवदनश्शकारः सचकितं दिशोऽवालोकयन् । पूर्वं चारुदत्तालब्धजीवनो विटः तस्य गुणमहिम्नो बिभ्यत् स्वकर्मणो लज्जमानः, मैत्रेयं प्रणामैः प्रसाद्य शकारमनापृच्छ्यैव निश्चक्राम । तदा एकाकिनमात्मानं दृष्ट्वा अन्तर्भीतश्शकारः, मैत्रेयमाहूय, "मया काम्यमाना नाटकस्त्री वसन्तसेना नाम गणिकादारिका सालङ्करणा त्वद्गेहं प्रविष्टा । श्वो न चेन्निर्यातयसि त्वया सह मे दारुणः क्षोभो भविष्यति" इति तन्मुखेन चारुदत्तस्य संदिश्य सत्वरमपाक्रामत् ॥

अत्रान्तरे असन्निहितदीपत्वादालोकविधुरे गृहोद्देशे स्थितः शिथिलितसमाधिश्चारुदत्तः स्वधृतं प्रावारकं चतुश्शालं नेतुं रदनिकाबुद्ध्या वसन्तसेनां प्रैरयत् । सा च तद्भ्रुती, "अभागिन्यहमभ्यन्तरप्रवेशाय" इति मत्वा जोषमास्त ; येन चारुदत्तश्रेटीवृत्तेन विसिष्मिये । तदा रदनिकाद्वितीयो मैत्रेयः प्रविश्य शकारसन्देशमचकथत् । दर्शयामास च तद्भीतिप्रविष्टां वसन्तसेनाम् । अथोपसृत्य वसन्तसेना चारुदत्तमभिवन्द्यावसरप्राप्तमित्थमूचे—"आर्य! शरणागतास्मि । अलङ्करणनिमित्तं पापा मामनुसरन्ति । तदत्रैव भाण्डानि निक्षिप्य आर्येण रक्षिता गेहं गन्तुमिच्छामि" इति । चारुदत्तः सप्रणयं पुनर्दर्शननिमित्तभूतं

तस्या अलङ्करणन्यासमभ्युपगम्य मैत्रेयरक्षितां तां गृहगमनाय विससर्ज ॥

तदुपक्रमं सा गणिका चारुदत्तमन्तरेण बलवदुत्कण्ठिता निसर्गपेशलेन मनसा सुदूरारूढां मदनबाधामुवाह । तथा हि—स्वमनोरमणगतया चिन्तया विडम्ब्यमाना यत्पारवश्येनाजल्पत् तत्रानुपदमेव सखीभिः पृष्टा किमपि न सस्मार । निरस्ताखिल-मण्डना स्नानाशनादिष्वप्यनास्थया शून्यहृदयेनावर्तत । सर्वदैव चारुदत्तस्य गुणान्सख्यनुमोदिता गृणती कृच्छ्रेण कालमक्षिपत् । चित्रफलके रहस्तत्प्रतिकृतिमालिख्य सस्नेहं निभालयन्ती उत्कण्ठां व्यनूनुदत् । तत्सम्बन्धिनं तद्गुणानुश्रावकमपि जन-मात्मीयं मत्वोपचचार । तथा च, कश्चिद्विभवमन्दतया चारुदत्तस्य निराश्रयमाहिण्डमानं संवाहकं द्यूते दशसु सुवर्णेषु पराजितमुत्तमर्ण-नुद्रुतमनुकम्प्य ऋणान्मोचयामास । स्वप्रसादार्थिना राजश्यालकेन पदे पदे प्रेषितानां परिच्छदविशेषाणां निवेदयितृकायापि सखी-जनाय नितरामसूयति स्म । "चारुदत्तः कथमभिसर्तव्यः, कथं वा तस्य समागमोऽविच्छिन्नं सुलभस्संपद्येत" इति विचिन्तयन्ती सदा तस्थौ ॥

अत्रान्तरे दाक्षिण्येन न्यासमङ्गीकृतवतो दरिद्रस्य चारु-दत्तस्यासुरक्षिते गेहे महार्हाणामाभरणानां रक्षणे आयास इवा-भवत् । तेन हि, व्यवस्थया, षष्ठ्यां सप्तम्यां च रदनिकया स भाण्डजातं धारयामास । अष्टम्यां तु रदनिका गान्धर्वश्रवणा-

निशार्धप्रतिनिवृत्तस्य निद्रोत्सुकिनो मैत्रेयस्य हस्ते, "अद्य खलु त्वय्यायततेऽस्य रक्षाभरावृत्तिः" इति समर्प्य न्यवर्तत । मैत्रेयो निर्बन्धवशात्तदश्रद्धया गृहीत्वा तूर्णं निद्रापरवशो बभूव ॥

अथ सज्जलको नाम कश्चित्साहसिको विप्रकुलीनोऽपि वसन्तसेनापरिचारिकायां मदनिकायां जातानुरागतया तन्निष्क्रयणमूल्यं चौर्येणापि निष्पादयितुकामः तस्यां निशायां पर्यटन् भवनप्रत्ययात् चारुदत्तगृहमेव सन्धिच्छेदं विधाय प्राविशत् । विचित्य च परितस्सं द्रव्यविशेषं कञ्चिदनासादयन् खिन्नः, "किन्नु खल्वागन्तुकत्वादविदितसमृद्धिविस्तरो दरिद्रगृहं प्रविष्टोऽस्मि । अथवा, यदभिजातो भवनविन्यासः, न चात्र कश्चित्परिच्छदविशेषः, तदनुभुक्तप्रनष्टविभवेनानेन भवितव्यम् । न खलु तुल्यावस्थः कुलपुत्रः पीडयितव्यः । तदितो गच्छामि" इति यावन्निववृते, तावत् चारुदत्तमभिभाषमाणो मैत्रेय उत्स्वप्नायामास—"भोः! गृहाणैतत्स्वर्णभाण्डम् । मम ब्रह्मत्वेन शापितोऽसि, यदि न गृह्णासि । एष दत्वा विक्रीतभाण्ड इव वणिक् सुखं स्वप्स्यामि" इति । अथ सज्जलको निपुणं निरूप्य जर्जरप्रावारकैकदेशे निबद्धं छिद्रप्रसृतकिरणावलीभासुरं अलङ्करणं दृष्ट्वा, "सुखं स्वपिहि महाब्राह्मण" इति वदन्नादाय पटहशब्दसूचितायां प्राभातिकवेलायां सत्वरमपासरत् ॥

प्रगे प्रचलिता रदनिका भित्तौ सन्धिमार्गमुपलक्ष्य संभ्रान्ता साक्रन्दमुपगम्य चारुदत्तमैत्रेयौ प्राबोधयत् । उभावपि

यावदुत्थाय पर्यपश्यतां तावन्मुष्टं न्यासभाण्डं बुबुधतुः। मैत्रेयः सस्मरणं, "मन्ये मया मन्दभाग्येन कुम्भीलकस्यैव हस्ते तत्समर्पितं, न पुनश्चारुदत्तस्य" इति निश्चित्य विषण्णोऽतिष्ठत्। तदा चारुदत्तः स्वशीलदोषे लोकं मुखरयिष्यन्तममुं विपाकमनुचिन्त्य पर्यदेवयत॥

"कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति।
शङ्कनीया हि दोषेषु निष्प्रभावा दरिद्रता॥" इति॥

एवमाकुलीभूतं भर्तारमवगत्य चारुदत्तब्राह्मणी भृशदुःखिता भर्तृप्रत्ययरक्षणप्रवणेन मनसा, "स्वेन दत्तमत्युदारो न गृह्णीयात्" इति मैत्रेयमुपह्वरे आनाय्य ब्राह्मणपूजामपदिश्य स्वज्ञातिकुलोपार्जितां शतसहस्रमूल्यां रत्नावलीं तस्मै प्रादात्। स च तदाशयं जानन् गृहीत्वा चारुदत्तं विज्ञापयामास—"भोः सदृशदारसंग्रहस्यैतत् फलं परिगृह्यताम्" इति। अभिमानी चारुदत्तः, "कथं ब्राह्मणी मामनुकम्पते। कष्टम्। इदानीमस्मि दरिद्रः यत्परिक्षीणभाग्यस्य मे स्त्रीद्रव्यमप्यादरणीयमभवत्" इति शोचन् वसन्तसेनायाः न्यासप्रतिनिधिं रत्नावलीमुपनेतुं मैत्रेयमन्वजानात्॥

सज्जलकस्तु प्रभात एव चोरितमलङ्करणजातमादाय वसन्तसेनागृहमुपाययौ। दृष्ट्वा च विजने मदनिकां न्यवेदयत् तस्याः कृते समनुष्ठितं साहसम्। अत्रान्तरे उपरिभूमिकायां वातायननिष्क्रामितपूर्वकाया वसन्तसेना दिष्ट्या सँल्लपन्तावेतौ

निर्वर्ण्य आत्मसम्बन्धिनी कथैषेति निभृतमुपशृण्वती तस्थौ । अथ मदनिका तान्याभरणानि निपुणं विलोक्य प्राह—"आर्यायाः खल्विमानि, पूर्वं चारुदत्तसकाशे न्यासीकृतानि । तत्किमनुष्ठितं भवता । तत्रैव तावन्निर्यातय । अथवा तस्य सार्थवाहपुत्रस्य वचनेनैव आर्यायै निर्यातय । एवं कृते, त्वं रक्षितः, स च आर्यः अनिर्विण्णो भविष्यति" इति । सज्जलकः कथमपि तदङ्गीकृत्य वसन्तसेनादर्शनार्हमवसरं कामदेवकुले प्रतिपालयामास । वसन्तसेना च सर्वमवधार्य, "पश्यामि किमत्र भविष्यति" इति कौतुकेनाभ्यन्तरं प्रविश्य पूर्ववदासीनाऽभवत् ॥

तदानीं चारुदत्तप्रहितो मैत्रेयः प्राप्तः । कृतातिथ्यश्चोपविष्ट उवाच । "तत्रभवता चारुदत्तेन त्वया न्यासीकृतः अलङ्कारः द्यूते हारितः । अतस्तस्य मूल्यभूतामिमां रत्नावलीं प्रतीच्छतु भवती" इति । तच्छ्रुत्वा वसन्तसेना, "धिक् खलु गणिकाभावम् । लुब्धेति मां तुलयति । यदि न प्रतीच्छामि स एव दोषो भवति ।" इति सञ्चिन्त्य तां रत्नावलीं प्रतिजग्राह ॥

अथ विसर्जिते मैत्रेये मदनिकाप्रवेशितोऽलङ्कारहस्तः सज्जलकस्समुपसृत्य चारुदत्तवचनमपादिशन् न्यासं वसन्तसेनायै प्रत्यर्पयामास । चतुरा वसन्तसेना तन्मुखेन चारुदत्तस्य प्रतिसन्देशं दातुमैच्छत् । स तु, "न खल्वहं तत्र गच्छामि" इति प्रत्युच्य निर्गन्तुं तत्वरे । तदानीं, "तेन हि मन्ये तस्य गृहे साहसं कृत्वा आनीतेनानेन भवितव्यम्" इति वसन्तसेना

तन्मर्म व्यवृणोत्। तेन च पर्याकुलं तमनुकम्पयन्ती सा मनस्विनी सर्वाङ्गभूषितां कृत्वा मदनिकां तस्य हस्ते समर्प्य, उभावपि दम्पती प्रवहण आरोप्य, सस्नेहबहुमानं यथेष्टगमनाय विससर्ज ॥

तस्मिन्नवसरे दुर्दिनमुन्नमितं दृष्ट्वा अविलम्बसहेन मन्मथेनोपदिश्यमानमार्गा तामेव रत्नावलीं निर्यातनीयामपदिश्य चारुदत्तमभिससार वसन्तसेना। ततःप्रभृति तावुभौ रतिमन्मथाविव चतुरिमोल्लसितनिरन्तररतिकेलिरसास्वादसुखितौ क्षणमिव क्षपाशतमनेषाताम् ॥

इति चारुदत्तचरितम्।

बह्वास्वादरसोर्मिला भणितयः प्रज्ञावतां यद्गुण-
ज्योत्स्नापूरविभावनाव्यतिकरान्निर्यान्ति सन्धुक्षिताः।
यातेभ्यो मनुजेषु देवगणनां तेभ्यो निसर्गाज्जग-
न्नेतृभ्यश्चरिताधिवासितदिशान्तेभ्यो महद्भ्यो नमः ॥ १ ॥

कुले महत्यप्पयदीक्षितानां वाग्देवतानित्यविहारभूमौ।
विपश्चितो यज्ञकवेस्सुतोऽस्मि कविर्महालिङ्ग इति प्रतीतः ॥२॥

सच्चरितवासलोभाद्रसवत्सन्दर्भचर्वणप्रीत्या।
निजवाक्छुद्ध्यै च मया भासकथासङ्ग्रहो व्यरचि ॥ ३ ॥

सद्भावदर्शितगुणप्रणयेन येन
चन्द्रायितं कुमुदिनीपदवीजुषोऽस्याः ।
त्यागाभिधाय सुहृदे गुरुगौरवेण
तस्मै प्रकृष्टरुचये कृतिरर्प्यते नः ॥ ४ ॥

निर्व्याजेन निरञ्जनेन मनसा स्वप्रत्ययं मानयन्
धीरो यः प्रणयी गुणेषु वहति स्वच्छन्दमुच्चैश्शिरः ।
तस्यास्वादविदः प्रसादसुधया नीरन्ध्रमाप्यायितं
कर्मेदं परिचीयमानसुषमं ख्यातिं परां विन्दतु ॥ ५ ॥

श्रीमान्पञ्चमजार्जभूपतिरिमामार्यान्वयाधिष्ठिता-
मार्ये वर्त्मनि वर्तयन्नविकलं पृथ्वीं चिरं शास्तु नः ।
दुष्कालव्यतिषङ्गदुर्गतधियां संरम्भपांसूत्कर-
प्रादुष्योपशमं तनोतु भगवानाराच्च नारायणः ॥ ६ ॥

समाप्तश्चायं उत्तरार्धः ।

इति श्रीमदप्पय्यदीक्षितेन्द्रवंशमुक्ताफलानां महामहोपाध्याय-श्रीत्यागराज-
मखिराजानां प्रपौत्रेण, पण्डितमान्यश्रीयज्ञस्वामिशास्त्रिवर्याणामात्मजेन
श्रीमन्महालिङ्गकविना विरचितो भासकथासारस्सम्पूर्णः ।

॥ शुभं भूयात् ॥

भासीयश्लोकानुक्रमणिका ॥

Index of Verses quoted from the Originals

(for Part III)

	Page.		Page.
अग्निं बद्ध्वा	... ११	भारतानां कुले जातो	... १२
इयं बाला	... १८	भारतानां कुले जातो	... २३
कः कं शक्तो	... २२	मिथ्योन्मादैश्च	... २३
कः श्रद्धास्यति	... ४३	ये सञ्चरन्ति गगने	... ३२
जनयति खलु रोषं	... ३९	योऽयं सन्त्रस्तया	... २०
तरुणजनसहायः	... ३९	शरच्छशाङ्कगौरेण	... १८
दत्ता सा विधिना	... ३५	स्मराम्यवन्त्या	... १८
पद्मावती बहुमता	... १७	स्वप्नस्यान्ते	... २०
बहुशोऽप्युपदेशेषु	... १९		

कविकृतश्लोकानामनुक्रमणिका ॥

Index of Verses by the Author (for all the Parts)

PART I.

	Page.		Page.
आपादितप्रलयसुप्त ...	१	तमालदलमेचकः ...	१

PART II.

यस्सत्ये गुरुमासयन् ...	३५	...	...

PART III.

कुलं वा शीलं वा ...	१	बह्वास्वादरसोर्मिलाः ...	४५
कुले महत्यप्पय ...	४५	सच्चरितवास ...	४५
सद्भावदर्शित ...	४६	निर्व्याजेन ...	४६
श्रीमान्पञ्चम ...	४६	...	...

GLOSSARY

॥ वत्सराजचरितम् ॥

Page.	Line.	Word.	Meaning.
1	5	प्रकाश	= Famous; celebrated.
1	6	समुदयः	= Multitude.
2	1	दुरितं	= Danger; calamity.
2	1	निराबाध	= Unmolested.
2	4	भ्रम्	Governs the acc. of place.
2	7	प्रत्यन्तवर्तिन्	= Occupying an adjacent country; a neighbouring potentate.
2	8	सांमुख्येन	= By means of a face to face encounter.
2	8	अक्षौहिणी	= A large army consisting of 21,870 charriots; as many elephants; 65,610 horses and 1,09,350 foot.
2	13	विषयान्तगहन	= An impenetrable forest in the frontier.
2	14	परिच्छद	= Train; retinue.
2	15	मदयन्ती...धेव	= Even before he had reached up to the hill named Madayanti.
3	5	सम्भावनीय	= Could be considered possible; thinkable.

Page.	Line.	Word.	Meaning.
3	13	प्रतिच्छन्दः	= A likeness ; image or substitute.
4	11	प्रतिकारः	= Remedy ; medical treatment.
4	11	मणिभूमिका	= A story of a house inlaid with jewels.
4	12	अवजित	= Won ; acquired by conquest
4	13	वैताली	= A female bard or minstrel.
4	19	उपस्थायकः	= A servant.
4	20	निरुपाधिक	= Guileless ; honest.
5	3	कृतान्तः	= Fate ; destiny.
5	4	अवस्थान्तरं	= Altered condition ; adversity.
5	10	तिथिपूजनं'	= Worship offered to the gods during particular lunar days.
5	11	पटहस्थाने	= Instead of the tabor being sounded (as it was usual when the king worshipped in his palace)
5	11	निगडाः	= Chains for the feet.
5	12	निष्कृतिः	= Discharge of a debt or an obligation.
5	19	न विप्रतिपद्यते	= does not get perplexed or confused.
6	9	परिच्छद	= Dress.
8	2	मल्लकः	= A cup made out of a cocoa-nut shell.
8	12	महासेनः	= According to Bhasa, another name for Pradyota.

Page.	Line.	Word.	Meaning.
9	7	नलागिरौ etc.	= Evidently Mahasena did not want to kill Nalagiri he being a pet one and the rarest of his kind and being probably also the coronation elephant which is usually held sacred.
9	17	योजनं	= A distance of four krosas or 8 or 9 miles.
9	20	आहिण्डमानः	= Roaming about.
10	13	भर्तृपिण्डानृण्यं गतस्य	= Who had been true to his master's salt.
12	2		काकुः
12	4	भृङ्गार	= A golden vase.

13	9	आदेशिक	= Soothsayer.
13	12	धिषणा	= Intellect.
13	13	धिषणः	= Brihaspati.
13	16	अभ्यवपत्तुकामः	= With the object of descending (into the fire) and delivering her (out of it.)
14	3	तापस्यै	= To the royal mother leading a तापसी's life.
14	8	क्षणः	= A fit moment or opportunity.

Page.	Line.	Word.	Meaning.
14	18	प्रतिष्ठिते च etc.	= When my lord is re-established in his glory and I seek to restore to him Vasavadatta, Padmavati shall stand by me and vindicate my conduct; (i.e.), shall mediate to infuse confidence into the king regarding my course of action since I separated Vasavadatta from him.
17	4	बहुमानसङ्कटं	= Difficulty about comparative regards.
17	5	दक्षिणः	= An amiable and courteous lover, though at heart bearing greater attachment to one of two mistresses.
17	18	मुखोदकं	= Water for washing the face.
18	11	समुद्रगृहकं	= A summer house built in the midst of water.
18	18	(आर्षः) better to read अवन्तीनृपतेः।	
19	3	कोण	= The bow of a lute or the intermediate points or corners (the स्वरस्थानs) of a Veena.
20	5	द्वारपक्ष	= Door-post.
22	18	अधिकरणं	= Court or tribunal.
23	13	मज्जमानाः (आर्षः) better to read निमज्जन्तः।	

॥ अविमारकचरितम् ॥

Page.	Line.	Word.	Meaning.
24	2	पेशल	= Tender ; lovely ; charming.
24	11	किमपि	= Indescribably (as to quality quantity or nature.)
25	7	अनादरतः	= indifferently, regardlessly.
26	8	अविः	= A sheep.
26	11	प्रत्यनन्तरीभवन्	= Living closely by ; following closely.
26	14	उन्मनायमानः	= Disturbed in mind ; agitated ; uneasy.
26	14	अन्यादृशः	= Changed ; unusual ; strange.
26	15	उल्लिखन्	= Painting ; delineating.
26	15	कल्पकल्पं	= Nearly equal to a thousand yugas or 432 million mortal years—measuring the duration of the world.
26	19	जातिस्मरः	= Remembering one's condition in former life.
28	11	कपिशीर्षक	= Coping of the wall perhaps on the model of a monkey's head.
28	15	किमपि	= Somewhat ; a little.
28	16	जालं	= Lattice or window.
28	17	यन्त्र	= A fetter—that which fastens.
29	2	परिप्लव	= Trembling, restless.
31	8	सङ्केतितः	= Invited.

Page.	Line.	Word.	Meaning.
33	11	आकाशतोयं	= Water falling from the sky; shower-bath.
34	8	सांवत्सरिकः	= An astrologer.
35	4	अप्रतिपत्तिः	= Non-perception, i.e., not knowing what course to follow.
36	4	समयः	= Conventional usage :— a ceremonial custom.

॥ चारुदत्तचरितम् ॥

37	1	उपश्रुत	= Heard; well-known.
37	2	चत्वरं	= A place where many roads meet.
37	3	व्यतिकर	= Affair or matter; connection—here mg. by means of (sea-voyages or trading ships across the sea.)
37	8	उदय	= Prosperity; also, rise.
37	12	गुणः	= Virtue; excellence; also, thread.
38	2	दुर्विधः	= Poor; indigent.
38	3	शकारः	= The brother of a king's wife not regularly married. He is usually a mixture of folly, vanity, cowardice and heartlessness.

Page.	Line.	Word.	Meaning.
38	12	पट्टः—ट्टं	= A diadem or silk-turban.
39	19	पक्षद्वारकं	= A side-door or private entrance.
39	21	चतुश्शालं	= A quadrangle enclosed by four buildings; a square of four buildings.
40	10	क्षोभः	= Irritation; disturbance; quarrel.
40	20	भाण्डं	= Any valued possession or treasure, (here) jewels.
41	9	प्रतिकृतिः	= A likeness or picture.
41	14	परिच्छदः	= Garment; dress; personal possessions.
41	20	व्यवस्थया	= By arrangement.
42	2	रक्षाभरावृत्तिः	= The responsibility of keeping safe by turns.
42	10	अभिजातः	= Handsome, noble-looking.
43	4	विपाकः	= Development, adverse turn of fate, distress.
44	7	कामदेवकुलं	= Temple of Cupid.
45	17	वासः	= Perfume.
46	12	प्रादुष्यं	= Manifestation.